play, except that he succeeded his father, Pushpamitra. To suppose then that the Mâlavikâgnimitra is the production of so late a date as the tenth or eleventh century would necessitate another supposition that the history of Pushpamitra and his son, Agnimitra, which is so familiarly alluded to in the drama, existed during these ages in a far more copious form than the bare mention of the princes in the Purâṇas. Nothing, however, favours such a supposition. The only inference, therefore, that is possible is, that the play was written while the story of Pushpamitra and Agnimitra was yet fresh in the memory of men, though not quite so fresh as to make it too recent to be made the subject of a drama. This would certainly require that we should assign the piece to a time several centuries earlier than the tenth or eleventh century, since Pushpamitra founded the dynasty that immediately followed the Mauryas, and must have accordingly done so about 160 years before Christ. To suppose that the deeds of Agnimitra were chosen to be the subject of a drama at a time when nothing more was known of him than we know through the Purâṇas, would be to suppose what is not at all probable.

But, in addition to this consideration, "the style of the play," says Professor Wilson, "is very unlike that most common amongst modern writers, and most highly esteemed, being free from all jingle of sounds and from metaphorical common-place; it does not even affect anything like the uniform smoothness which seems to have preceded and ushered in the extravagancies

of modern composition." Who will not be struck by the simplicity and elegance of the style of the Mâlavikâgnimitra, the total absence in it of those monstrous long compounds, which are so wearisome already in Bhavabhûti, who may belong somewhat to the beginning of the eighth century? If we had nothing else to guide us in fixing with tolerable exactness at least the century which produced the present play, the style and diction of it would alone be sufficient for assuming that it could not have been the production of any time that was not several centuries prior to the age of Bhavabhûti. In what author, again, of those ages of elaborateness and pedantry, of which the beginning is marked by the great Bhavabhûti, shall we find such a sound piece of criticism as that put into the mouth of the stage-manager (page 2, stanza 2) by the author of the Mâlavikâgnimitra? As Professor Wilson truly remarks, "it is the sentiment of a day long gone by."

There is yet another point, which, though failing against our expectations, to determine the age of the drama at present, may yet possibly reward future research. I allude to the mention in the prologue of the poets Bhâsa and Saumilla, as predecessors of Kâlidâsa. Unfortunately, Sanskrit chronology is as yet, and perhaps will be, it is difficult to say for how many ages to come, a labyrinth of uncertainties. If nothing positively is known about the time when Kâlidâsa flourished, it is equally uncertain when Bhâsa and Saumilla, his predecessors, lived! To add to the uncertainty of the ages of these latter, it does not as yet appear to be decided

how we are to read their names. Dr. Tullberg chose to read, according to one MS., which is identical with that used by Professor Wilson, and which Professor Weber calls "bad in many ways," धावकसौमिल्लकविपुत्रादीनां in the prologue. Professor Weber is right in his guess that the reading *Dhâvaka* in place of *Bhâsa*[*ka*], found as it is in one single "bad" MS., is a correction "coming from a scribe who knew Dhâvaka, and not *Bhâsa*[*ka*]," the *lectio difficilior*, and must therefore, as is often the case, have substituted it for the latter. Dr. Hall (*Vâsavadattâ*, preface, page 15,) believes that he has come to the conclusion "that the poets whom it [the play] names with Bhâsaka are Râmila and Saumilla." None of the seven MSS., however, which I have collated give either *Dhâvaka*, as hinted at by Professor Wilson, and adopted by Dr. Tullberg, nor Râmila, as added by Dr. Hall. They all unanimously read Saumilla for the second, Bhâsa for the first, and except one (G.) they read simply the honorific मिश्र for the third. Now nothing is known of any of these two or three poets referred to in the prologue. Bhâsaka is nowhere mentioned as a poet. It is a mere gratuitous conjecture that Bhâsaka may be the same as the Bhâsa so much applauded in the introduction* of the Harshacharita, and mentioned by Râjas'ekhara in the verses quoted from the *S'ârngadhara-paddhati*.†

* सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः । सपताकैर्यशो लेभे भासो देवकुलैरिव, as quoted by Dr. Hall, *Vâsavadattâ*, preface, page 14.

† भासो रामिलसौमिलौ वररुचिः श्रीसाहसाङ्कः कविर्मेघो भारविकालिदासतरलाः स्कन्धः सुबन्धुश्च यः । &c., *Ibid.* page 20.

But, supposing *Bhâsa* to be the correct reading, and not *Bhâsaka*, we gain nothing, as all that we know of *Bhâsa* is that he was a dramatist, and flourished before Rajas'ekhara, as shown by the passage from the *Harshacharita*. Of *Saumilla* we know absolutely nothing at present, nor of *Kaviputra*, if that be one of the predecessors named in our prologue. It is just possible that future researches into the history of *Bhâsa* or *Saumilla*, or *Kaviputra*, none of whose works are known to exist, may throw some light on the earliest limit of age that we must assign to Kâlidâsa.

The character of "*Parivrâjikâ*" in the play appears to me of some importance in examining Professor Wilson's statement that the Mâlavikâgnimitra belongs to the tenth or eleventh, or even a later, century. As Professor Wilson says, "a Parivrâjikâ denotes an ascetic female of the Bauddha faith," and though, according to him, "there is nothing in the piece to assign the character to any particular sect," it does most likely belong to the Bauddha religion. A female ascetic, properly so called, is nowhere met with in the Brahmanical writings. A widow, who, not burning herself on the funeral pile of her dead husband, survives him, and leads a life of austerities, is, no doubt, a kind of '*Sannyâsinî*,' or '*Parivrâjikâ*'; but such a widow is neither called by the latter name, nor enjoined to assume the garments of the ascetic; nor is the 'widow Sannyâsa' ever praised as a "path fit for the virtuous" (सज्जनस्य पन्था: page 103, l. 10); but, on the contrary, that honour

is given to the widow who burns herself with the corpse of her husband, and the 'widow Sannyâsa' is enjoined only as an alternative when the woman, under peculiar circumstances, is prevented from sacrificing herself to the flames. Nor are such garments as the Parivrâjikâ of the play assumed enjoined by the Hindu S'âstra to be worn by widows. When to this we add that the Parivrâjikâ, as the word signifies, is a wandering or itinerant mendicant, while the Hindu widow in general is never a *wandering mendicant*, it is perfectly clear that Kaus'ikî does not profess the Brahmanical religion. Further, wherever we meet with a *Parivrâjikâ* it is a Buddhistic female mendicant belonging to one or other of the sects of that religion. And when we bear in mind that though there may have been female itinerant mendicants belonging to any other sect, they are nowhere stated to have been reverentially treated in the courts of kings, it is highly probable, nay, almost certain, that Kaus'ikî was a Buddhistic mendicant. And when the religion of Buddha had already been banished from India by the end of the eighth century, it is not very natural to suppose that an author, who wrote, according to Professor Wilson, in the tenth or eleventh century, when the professors of the Brahmanical faith looked down upon the few lingerers, if these were left behind in any considerable number, from amongst their once powerful rivals, may have introduced a character in his drama professing the despised religion, and may have, moreover, made the whole court of a powerful prince pay her a most reverential homage.

Such a supposition would only be possible if the author of the Mâlavikâgnimitra had made it his object to represent by means of that play how Buddhism, that was dead in his time, had once been revered in the courts of princes. But such is not, as any one may perceive, the burden of the play; nor is it at all likely that Agnimitra might be chosen as an exemplary champion of Buddhism, even if the poet had intended to sing the former greatness of that religon, since the S′ungas, to which dynasty Agnimitra belonged, are represented to have been far from favourable to the followers of Buddha. The probability, therefore, is that the play was written, not at a time when Buddhism was despised, and had already been driven out of India, but when it was still regarded with favour, and was looked up to with reverence; and this must refer us to a time several centuries prior to the tenth or eleventh century after Christ.

In conclusion, I must confess I do not see the slightest ground for the supposition that the Mâlavikâgnimitra belongs to a different Kâlidâsa from the author of the "Lost Ring" or the "Heavenly Nymph," a supposition accidentally entertained by Professor Wilson, and unfortunately strengthened subsequently by the very incorrect state in which the public has had to read the play in Dr. Tullberg's edition. If by the present edition any success is achieved in the eyes of the cultivators of Sanskrit literature in restoring the play to its original purity, and in enabling thereby the reader to judge whether it does or does not belong to the great

Kâlidâsa, I shall regard my humble task more than sufficiently rewarded. And as for the author of the play, I hope I may be allowed to say, with the learned Professor Weber,—"So möge sich denn dies zierliche Drama auch in einen weiteren Kreise, als bisher, Freunde erwerben und zu dem wohl verdienten europäischen—[I had rather say *allgemeinen*]—Lorbeerkranze des *Kâlidâsa*, seines Verfassers, dadurch ein neues duftiges Blatt hinzugefügt werden!"

S. P. P.

Deccan College, Poona,
1*st September* 1869.

CORRIGENDA.

P. 31, l. 7, read the stage-direction प्रस्थिता after ल्हेहि in l. 6.

P. 38, l. 13, read रक्ताशोकरुचाविशेषितगुणो

P. 62, l. 15, „ पिङ्गलाक्ष्या

P. 73, l. 17, „ रत्नभाण्डं यौवनगर्वं

P. 83, l. 18, „ सर्प इति

P. 84, l. 3 English notes, right-hand column, read पुच्छिदव्वो.

Dramatis Personae

King (राजा) अग्निमित्र.
Minister (अमात्यः) वाहतव.
Jester (विदूषकः) गौतम.
Chamberlain [illegible] मौद्गल्य.
[illegible] हरदत्त.
Music-[illegible] (आचार्यौ) गणदास.
[illegible] कौशिकी.
Queen (देवी) धारिणी.
इरावती.
बकुलावलिका
Porteress (प्रतीहारी) – जयसेना
Minister (अमात्यः) वाहतव
Keeperess ( ) माधविका
D.o servant (द्वि° परिचारिका) चन्द्रिका
serving-maid (चेटी) नागरिका

॥ अथ मालविकाग्निमित्रम् ॥



एकैश्वर्ये स्थितोपि प्रणतबहुफलो यः स्वयं कृत्तिवासाः
कान्तासंमिश्रदेहोप्यविषयमनसां यः पुरस्ताद्यतीनाम् ।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः
सन्मार्गालोकनाय व्यपनयतु स नस्तामसीं वृत्तिमीशः ॥ १ ॥

नान्द्यन्ते

सूत्रधारः । नेपथ्याभिमुखमवलोक्य । मारिष इतस्तावत् ।

पारिपार्श्वकः । प्रविश्य । भाव अयमस्मि ।

सूत्र॰ । अभिहितोस्मि परिषदा कालिदासग्रथितवस्तु मालविकाग्निमित्रं नाम नाटकमस्मिन्वसन्तोत्सवे प्रयोक्तव्यमिति । तदारभ्यतां संगीतकम् ।

पारि॰ । मा तावत् । प्रथितयशसां भाससकविसौमिल्लकविमिश्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां कथं परिषदो बहुमानः ।

---

1. D F एकैश्वर्ये for एकैश्वर्य°. | 4. F वः for नः.

That's often said without judgment

सूत्र० । अयि विवेकविश्रान्तमभिहितम् । पश्य ।

cf. Horace Ep. ii 1 sc.

पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद्भजन्ते
मूढः परप्रत्ययनेयबुद्धिः ॥ २ ॥

पारि० । आर्यमिश्राः प्रमाणम् ।

सूत्र० । तेन हि त्वरतां भवान् ।

शिरसा प्रथमगृहीतामाज्ञामिच्छामि परिषदः कर्तुम् ।
देव्या इव धारिण्याः सेवादक्षः परिजनोयम् ॥ ३ ॥

servant [निष्क्रान्तौ ।

॥ प्रस्तावना ॥

। ततः प्रविशति चेटी ।

चेटी । आणत्तम्हि देवीए धारिणीए अइरप्पउत्तोवदेसं चलिअं णाम णट्टअं अन्दरेण कीरिसी मालविएत्ति णट्टाआरिअं अज्जगणदासं पुच्छिदुं । ता जाव संगीदसालं गच्छेमि । इति परिक्रामति ।

। प्रविशत्यपरा चेट्याभरणहस्ता ।

प्रथमा । अन्यां दृष्ट्वा । हेला कोमुदीए कुदो दे इअं धीरदा । जं समीवेवि अदिक्कमन्ती इदो दिट्ठिं ण देसि ।

---

१. आज्ञप्तास्मि देव्या धारिण्याचिरप्रवृत्तोपदेशं चलितं नाम नाट्यमन्तरेण कीदृशी मालविकेति नाट्याचार्यमार्यगणदासं प्रष्टुम् । तद्यावत्संगीतशालां गच्छामि ।

२. हला कौमुदिके कुतस्त इयं धीरता । यत्समीपेप्यतिक्रामन्तीतो दृष्टिं न ददासि ।

---

14. A C चलीअं; D चलीयं.—A C णाट्टअं; B D णट्ठअं.—F अन्तरेण— B C मालविअत्ति; D F मालविअत्ति.

15. A C अअ; B D E F अ-अ. A B C D E om. ता before जाव.

16. B D E गच्छिम; F गच्छामि.

17. F adds ततः before "प्रविशति."

18. A B C D E om. दे.—F धीरद.

19. B अदिक्कमती.— A C न देसि.

द्वितीया । [1]अम्हो बउलावलिआ । सहि देवीए इदं सिप्पिसआसादो आणीदं सप्पमुद्दासणाहं अङ्गुलीअअं सिणिध्धं णिज्झाअन्ती तुह उवालम्भे पडिदम्हि ।

बकुलावलिका । विलोक्य । [2]ठाणे क्खु सज्जदि दिट्ठि । इमिणा अङ्गुलीअएण उब्भिण्णकिरणकेसरेण कुसुमिदो विअ दे अग्गहत्थो पडिभादि ।

कौमुदिका । [3]हला कहिं पत्थिदासि ।

बकु० । [4]देवीए वअणेण णट्टाआरिअं अज्जगणदासं उवदेसग्गहणे कीरिसी मालविएत्ति पुच्छिदुं ।

कौमु० । [5]सहि ईदिसव्वावारेण असंणिहिदावि दिट्ठा किल सा भट्टिणा ।

बकु० । [6]आम् । देवीए पस्संगदो सो जणो चित्ते दिट्ठो ।

---

१. अहो वकुलावलिका । सखि देव्या इदं शिल्पिसकाशात् आनीतं सर्पमुद्रासनाथमङ्गुलीयकं स्निग्धं निध्यायन्ती तवोपालम्भे पतितास्मि ।

२. स्थाने खलु सज्जति दृष्टिः । अनेनाङ्गुलीयकेनोद्भिन्नकिरणकेसरेण कुसुमित इव तेऽग्रहस्तः प्रतिभाति ।

३. हला क्व प्रस्थितासि ।

४. देव्या वचनेन नाट्याचार्यमार्यगणदासमुपदेशग्रहणे कीदृशी मालविकेति प्रष्टुम् ।

५. सखि ईदृशव्यापारेणासंनिहितापि दृष्टा किल सा भर्त्रा ।

६. आम् । देव्याः पार्श्वगतोऽसौ जनश्चित्रे दृष्टः ।

---

1. A C D बहुला.°
4. A B C D E om. क्खु.
5. D विय for विअ.
6. B D E F पडिभाइ.
8. F सुणाहि.—A E F णट्टा.°—A C D E अ-अ°; F अय°.
9. F कीदिसी.
10. A C इदिस°; F ईरिस°.
12. E आम्म देवीए.—B पस्सगदो, D पस्संगदो, F पस्सगओ.

कौमु० । [१]कहं विअ ।

बकु० । [२]सुणाहि । चित्तसालं गदा देवी पच्चग्गवण्णराअं चित्तलेहं आअरिअस्स ओलोअन्ती चिट्ठइ । तस्सिं अन्तरे भट्टा उवट्ठिओ ।

कौमु० । [३]तदो तदो ।

बकु० । [४]तदो अ उवआराणन्दरं एकासणोवविट्ठेण भट्टिणा चित्तगदाए देवीए परिअणमज्झगअं आसण्णअरं तं पेक्खिअ देवी पुच्छिदा ।

कौमु० । [५]किं विअ ।

बकु० । [६]अपुव्वरूवा इअं दारिआ तुह आसण्णा आलिहिदा किंणामहेएत्ति ।

कौमु० । [७]आकिदिविसेसेसु आदरो पदं करेइ । तदो तदो ।

---

१. कथमिव ।

२. शृणु । चित्रशालां गता देवी प्रत्यग्रवर्णरागं चित्रलेखमाचार्यस्यावलोकयन्ती तिष्ठति । तस्मिन्नन्तरे भर्तोपस्थितः ।

३. ततस्ततः ।

४. ततश्चोपचारानन्तरमेकासनोपविष्टेन भर्त्रा चित्रगताया देव्याः परिजनमध्यगतामासन्नतरां तां प्रेक्ष्य देवी पृष्टा ।

५. किमिव ।

६. अपूर्वरूपेयं दारिका तवासन्नालिखिता किंनामधेयेति ।

७. आकृतिविशेषेष्वादरः पदं करोति । ततस्ततः

---

2. A C सुणादु.—D °साला, F °सालागदा.—A C °वणराअं.

3. B आअरीअस्स.—B C D E अन्दरे.—F तहिं for तस्सिं.

4. B वुवट्ठिदो, C D वुवट्ठिओ.

6. F °णन्तरं.

8. E om. तं before "पेक्खिअ."

10. A B C D दारीआ.—A B C D E अपुव्वा इअं.

11. B C D F °हेअत्ति.

बकु० । तदो अवहीरिअवअणो भट्टा संकिदो देविं पुणोपुणो अवि णिब्बन्धिदुं पवुत्तो । तदो कुमालीए वसुलच्छीए आचक्खिदं । अज्जउत्त एसा मालविएत्ति ।

कौमु० । सरिसं क्खु बालभावस्स । तदो वरं कहेहि ।

बकु० । किं अण्णं । संपदं सविसेसं मालविआ भट्टिणो दंसणपहादो रक्खीअदि ।

कौमु० । हला अणुचिट्ठ अप्पणो णिओअं । अहंवि देवीए अङ्गुलीअअं उवणइस्सं ।

[इति निष्क्रान्ता ।

बकु० । परिक्रम्यावलोक्य च । एसो णट्टाअरिओ अज्जगणदासो संगीदसालादो णिक्कमदि । जाव अत्ताणं दंसेमि ।

गणदासः । प्रविश्य । कामं खलु सर्वस्य कुलविद्या बहुमता । न पुनरस्माकं तु नाट्यं प्रति मिथ्यागौरवम् । कुतः ।

---

१. ततोवधीरितवचनो भर्ता शङ्कितो देवीं पुनःपुनरपि निर्बन्धितुं प्रवृत्तः । ततः कुमार्या वसुलक्ष्म्याख्यातम् । आर्यपुत्र एषा मालविकेति ।

२. सदृशं खलु बालभावस्य । ततः परं कथय ।

३. किमन्यत् । सांप्रतं सविशेषं मालविका भर्तुर्दर्शनपथाद्रक्ष्यते ।

४. हला अनुतिष्ठस्वात्मनो नियोगम् । अहमपि देव्या अङ्गुलीयकमुपनेष्यामि ।

५. एष नाट्याचार्य आर्यगणदासः संगीतशालाया निष्क्रमते । यावदात्मानं दर्शयामि ।

---

1. A B C D E अवहिरिअणअणो.
2. A B C D E give अ for अवि. —A D णिबन्धिदुं.—D E पउत्तो. —A C कुमालिए.
3. E अचक्खिदं.—F आवुत्त for अज्जउत्त, with an explanatory note, आवुत्तो भगिनीपतिः, with also another preceding it वसुलक्ष्मीः देव्याः कनीयसी.
6. D दंसन°.—B D E रक्खीयदि.
10. A णट्टाचारिओ, F °आरिओ.—D E F अ-अ.°
11. B D E णीक्कमइ, F णिक्कमइ—A C अत्ताणं.

देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषं
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा ।
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् ॥४॥

बकु॰ । उपगम्य । अज्ज वन्दामि ।

गण॰ । भद्रे चिरं जीव ।

बकु॰ । अज्ज देवी पुच्छदि । अवि उवदेसग्गहणे णादिकिलिसेदि वो सिस्सा मालविएत्ति ।

गण॰ । विभाव्यतां देवी परमनिपुणा मेधाविनी चेति । किं बहुना ।

यद्यत्प्रयोगविषये भाविकमुपदिश्यते मया तस्यै ।
तत्तद्विशेषकरणात्प्रत्युपदिशतीव मे बाला ॥ ५ ॥

बकु॰ । आत्मगतम् । अदिक्कमन्तीं विअ इरावतीं पेक्खामि । प्रकाशम् । किदत्था दाणिं वो सिस्सा । जस्सिं गुरुअणो एव्वं तुस्सदि ।

गण॰ । भद्रे तद्विधानामसुलभत्वात्पृच्छामि । कुतो देव्यास्तत्पात्रमानीतम् ।

---

१. आर्य वन्दे ।
२. आर्य देवी पृच्छति । अप्युपदेशग्रहणे नातिक्लिश्नाति वः शिष्या मालविकेति ।
३. अतिक्रामन्तीमिवेरावतीं प्रेक्षे । कृतार्थेदानीं वः शिष्या । यस्यां गुरुजन एवं तुष्यति ।

---

2. F स्वाङ्गैर्वि॰
5. D E F अ-अ.
7. D E F अ-अ.—F णादिकिलिस्सदि.
9. F विज्ञाप्यताम् for विभाव्यताम्.
11. B उद्दिश्यते.
14. F दाणीं.—B एव्व.
16. F आयातं for आनीतम्.

बकु० । अत्थि देवीए वण्णावरो भादा वीरसेणो णाम । सो भट्टिणा अन्तपालदुग्गे मन्दाअणीदीरे ठाविदो । तेण सिप्पाहिआरे जोग्गा इअं दारिएत्ति भइणीए उवाअणं पेसिदा ।

गण० । आत्मगतम् । आकृतिप्रत्ययादेनामनूनवस्तुकां संभावयामि । प्रकाशम् । मया भद्रे यशस्विना भवितव्यम् । पश्य ।

पात्रविशेषन्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः ।
जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य ॥ ६ ॥

बकु० । अह कहिं वो सिस्सा ।

गण० । इदानीमेव पञ्चाङ्गमभिनयमुपदिश्य विश्रम्यतामित्यभिहिता दीर्घिकावलोकनगवाक्षगताग्रवातमासेवमाना तिष्ठति ।

बकु० । तेण हि अणुजाणादु मं अज्जो । जाव से अज्जपरितोसणिवेदणेण उच्छाहं वड्ढेमि ।

गण० । दृश्यतां सखी । अहमपि लब्धक्षणः स्वगृहं गच्छामि ।

[इति निष्क्रान्तौ ।

॥ विष्कम्भकः ॥

---

१. अस्ति देव्या वर्णावरो भ्राता वीरसेनो नाम । स भर्त्रान्तपालदुर्गे मन्दाकिनीतीरे स्थापितः । तेन शिल्पाधिकारे योग्येयं दारिकेति भगिन्या उपायनं प्रेषिता ।

२. अथ क्व वः शिष्या ।

३. तेन ह्यनुजानातु मामार्यः । यावदस्या आर्यपरितोषनिवेदनेनोत्साहं वर्धये ।

---

1. B वण्णाव्वरो.—B भाद्दा.

2. F मन्दाकिणीतीरे.—A B C D सिप्पाहिअरे.

4. F आकृतिविनयप्रत्ययाद्.

6. F पात्रविशेषे न्यस्तम्.

8. A C E अहवा for अह.

9. F पञ्चाङ्गाभिनयम्.

10. A E F °गता प्रवातम्.

12. F अ॰ओ.—F अ॰अपरितोस°.

16. B मिश्रविष्कम्भकः, E F मिश्रविष्कम्भः.

। ततः प्रविशत्येकान्तस्थपरिजनो मन्त्रिणा लेखहस्तेनान्वास्यमानो राजा ।

राजा । अनुवाचितलेखममात्यं विलोक्य । वाहतव किं प्रपद्यते वैदर्भः ।

अमात्यः । आत्मविनाशम् ।

राजा । संदेशमिदानीं श्रोतुमिच्छामि ।

अमा॰ । इदमिदानीमनेन प्रतिलिखितम् । पूज्येनाहमादिष्टः । पितृव्यपुत्रो भवतः कुमारो माधवसेनः प्रतिश्रुतसंबन्धो ममोपान्तिकमुपागच्छन्नन्तरा त्वदीयेनान्तपालेनावस्कन्द्य गृहीतः । स त्वया मदपेक्षया सकलत्रसोदर्यो मोचयितव्य इति । तन्न वो न विदितं यत्तुल्याभिजनेषु भूमिभरेषु राज्ञां वृत्तिः । अतो मध्यस्थः पूज्यो भवितुमर्हति । सोदर्या पुनरस्य ग्रहणविप्लवे विनष्टा । तदन्वेषणाय प्रयतिष्ये । अथावश्यमेव माधवसेनः पूज्येन मोचयितव्यः । श्रूयतामभिसंधिः ।

मौर्यसचिवं विमुञ्चति यदि पूज्यः संयतं मम श्यालम् ।
मोक्ता माधवसेनं ततोऽहमपि बन्धनात्सद्यः ॥ ७ ॥

इति ।

---

2. D वाहतक, corrected, it seems, from original वाहतव.
5. A B C D E प्रतिलेखितम्.
9. A B C D E omit the न after वो.—A B C तत्तुल्या.
10. A C राजसु राज्ञः for भूमिभरेषु राज्ञाम्.
16. B omits "इति."

राजा । कथम् । कार्यविनिमयेन मयि व्यवहरत्यनात्मज्ञः । वाहतव प्रकृत्यमित्रः प्रतिकूलचारी मे वैदर्भः । तद्यातव्यपक्षे स्थितस्य पूर्वसंकल्पितमुन्मूलनाय वीरसेनप्रमुखदण्डचक्रमाज्ञापय ।

अमा० । यदाज्ञापयति देवः ।

राजा । अथ वा किं भवान्मन्यते ।

अमा० । शास्त्रदृष्टमाह देवः । कुतः ।

अचिराधिष्ठितराज्यः शत्रुः प्रकृतिष्वरूढमूलत्वात् ।
नवसंरोहणशिथिलस्तरुरिव सुकरः समुद्धर्तुम् ॥ ८ ॥

राजा । तेन ह्यवितथं तन्त्रकारवचनम् । इदमेव निमित्तमादाय समुद्योज्यतां सेनापतिः ।

अमा० । तथा ।

[इति निष्क्रान्तः ।

परिजनो यथाव्यापारं राजानमभितः स्थितः

विदूषकः । प्रविश्य । आणत्तोम्हि तत्तहोदा रण्णा । गोदम चिन्तेहि दाव उवाअं जह मे जदिच्छादिट्ठपडिकिदी मालविआ पच्चक्खदंसणा भवेत्ति । मएवि तह किदं । जाव से णिवेदेमि । परिक्रामति ।

राजा । विदूषकं दृष्ट्वा । अयमपरः कार्यान्तरसचिवोऽस्मानुपस्थितः ।

---

१. आज्ञप्तोऽस्मि तत्रभवता राज्ञा । गौतम चिन्तय तावदुपायं यथा मे यदृच्छादृष्टप्रतिकृतिर्मालविका प्रत्यक्षदर्शना भवेदिति । मयापि तथा कृतम् । तावदस्य निवेदयामि ।

---

4. F °प्रमुखं.
15. B अणत्तम्हि, C अणत्तोम्हि, F आणत्तम्हि.
16. B चिन्तहि.
18. B णिवेदम्मि.

विदूषकः । उपसृत्य । [1]वड्ढदु भवं ।

राजा । सशिरःकम्पम् । इत आस्यताम् ।

विदूषकः । उपविष्टः ।

राजा । कच्चिदुपेयोपायदर्शने व्यापृतं ते प्रज्ञाचक्षुः ।

विदूषकः । [2]आः पओअसिध्धिं पुच्छ ।

राजा । कथमिव ।

विदूषकः । कर्णे । [3]एवं विअ ।

राजा । साधु वयस्य निपुणमुपक्रान्तम् । दुरधिगमसिद्धावप्यस्मिन्नारम्भे वयमाशंसामहे । कुतः ।

अर्थं सप्रतिबन्धं प्रभुरधिगन्तुं सहायवानेव ।
दृश्यं तमसि न पश्यति दीपेन विना सचक्षुरपि ॥९॥

। नेपथ्ये ।

अलमलं बहु विकथ्य । राज्ञः समक्षमेवावयोरधरोत्तरव्यक्तिर्भविष्यति ।

राजा । सखे त्वन्नीतिपादपस्य पुष्पमुद्भिन्नम् ।

विदूषकः । [4]फलं वि देक्खिस्ससि ।

। ततः प्रविशति कञ्चुकी ।

कञ्चुकी । देव अमात्यो विज्ञापयति । अनुष्ठिता प्रभोराज्ञा ।

---

१. वर्धतां भवान् ।
२. आः प्रयोगसिद्धिं पृच्छ ।
३. एवमिव ।
४. फलमपि द्रक्ष्यसि ।

---

1. A B C वट्टदु.
5. A E आ for आः
13. A B C D E बहुविकत्थनेन.
16. A C देक्खिस्सति; F दक्खिस्ससि.
18. F reads काञ्चुकेयः and retain the same form everywhere subsequently.

एतौ पुनर्हरदत्तगणदासौ
उभावभिनयाचार्यौ परस्परजयोद्यतौ ।
त्वां द्रष्टुमिच्छतः साक्षाद्भावाविव शरीरिणौ ॥ १० ॥

राजा । प्रवेशय तौ ।

कञ्चुकी । यदाज्ञापयति देवः । इति निष्क्रम्य पुनस्ताभ्यां सह प्रविश्य । इत इतो भवन्तौ ।

हरदत्तः । राजानमवलोक्य । अहो दुरासदो राजमहिमा । तथा हि ।

न च न परिचितो न चाप्यगम्यश् "he is not altogether unknown nor is he unapproachable"
चकितमुपैमि तथापि ("yet") पार्श्वमस्य ।
सलिलनिधिरिव प्रतिक्षणं मे
भवति स एव नवो नवोयमक्ष्णोः ॥ ११ ॥

गण० । महत्खलु पुरुषाधिकारमिदं ज्योतिः । तथा हि ।

द्वारे नियुक्तपुरुषानुमतप्रवेशः
सिंहासनान्तिकचरेण सहोपसर्पन् ।
तेजोभिरस्य विनिवर्तितदृष्टिपातैर्
वाक्यादृते पुनरिव प्रतिवारितोस्मि ॥ १२ ॥

कञ्चुकी । एष देवः । उपसर्पतां भवन्तौ ।

उभौ । उपेत्य । विजयतां देवः ।

राजा । स्वागतं भवद्भ्याम् । परिजनं विलोक्य । आसने तावदत्र भवतोः ।

---

3. A B C D E विवादिनौ for शरीरिणौ.
7. F विलोक्य.
8. F reads the first pâda thus: 'न च परिचितो न चापरम्यः'
10. F जलनिधि° corrected from सलिलनिधि°.
17. A E उपसर्पताम् as an after-correction in both.

उभौ । परिजनोपनीतयोरासनयोरुपविष्टौ ।

राजा । किमिदं शिष्योपदेशकाले युगपदाचार्ययोरुपस्थानम् ।

गण० । देव श्रूयताम् । मया तीर्थादभिनयविद्या शिक्षिता । दत्तप्रयोगोऽस्मि । देवेन देव्या च परिगृहीतः ।

राजा । दृढं जाने ।

गण० । सोऽहममुना हरदत्तेन प्रधानपुरुषसमक्षमयं मे पादरजसा न तुल्य इत्यधिक्षिप्तः ।

हर० । देव अयमेव मयि प्रथमं परिवादरतः । अत्रभवतः किल मम च समुद्रपल्वलयोरिवान्तरम् । तदत्रभवानिमं मां च शास्त्रे प्रयोगे च विमृशतु । देव एव नौ विशेषज्ञः प्राश्निकश्च ।

विदूषकः । [1]समत्थं पडिण्णादं ।

गण० । प्रथमः कल्पः । अवहितो देवः श्रोतुमर्हति ।

राजा । तिष्ठतु तावत् । पक्षपातमत्र देवी मन्यते । तत्तस्याः पण्डितकौशिक्या सहितायाः समक्षमेव न्याय्यो व्यवहारः ।

विदूषकः । [2]सुट्ठु भवं भणादि ।

उभौ । यद्देवाय रोचते ।

राजा । मौद्गल्य अमुं प्रस्तावं निवेद्य पण्डितकौशिक्या सार्धमाहूयतां देवी ।

---

१. समर्थं प्रतिज्ञातम् । | २. सुष्ठु भवान्भणति.

---

6. A B C D E मम for अयं मे.
10. B विमृश्यतु, F विमर्शयतु.
12. A C D E पडिणदं, B पडिण्णदं.
16. D भणादी, F भणादि.

कञ्चुकी । यदाज्ञापयति देवः । इति निष्क्रम्य सहपरिव्राजिकया देव्या सह पुनः प्रविश्य । इत इतो देवी धारिणी ।

देवी । परिव्राजिकां विलोक्य । [1]भअवदि हरदत्तस्स गणदासस्स अ संरम्भे कहं पेक्खसि ।

परिव्राजिका । अलं स्वपक्षावसादशङ्कया । न च पराजीयते केनचिद्गणदासः ।

देवी । [2]जइवि एव्वं तहवि राअपरिग्गहो से पहाणत्तणं उवहरइ ।

परिव्राजिका । अयि राज्ञीशब्दभाजनमात्मानमपि तावच्चिन्तयतु भवती । पश्य ।

अतिमात्रभास्वरत्वं पुष्यति भानोः परिग्रहादनलः ।
अधिगच्छति महिमानं चन्द्रोऽपि निशापरिगृहीतः ॥१३॥

विदूषकः । [3]अवि हा अवि हा । उवट्ठिआ पीठमादिअं पण्डिअकोसिइं पुराकदुअ देवी ।

राजा । पश्याम्येनाम् । यैषा

मङ्गलालंकृता भाति कौशिक्या यतिवेषया ।
त्रयी विग्रहवत्येव सममध्यात्मविद्यया ॥ १४ ॥

परिव्राजिका । उपेत्य । विजयतां देवः ।

---

१. भगवति हरदत्तस्य गणदासस्य च संरम्भे कथं प्रेक्षसे ।
२. यद्यप्येवं तदपि राजपरिग्रहोऽस्य प्रभुत्वमुपहरति ।
३. अपि हा अपि हा । उपस्थिता पीठमर्दिकां पण्डितकौशिकीं पुरस्कृत्य देवी ।

---

2. F इतो देवी । इतो धारिणी देवी.
7. A C जई for जइ.
8. A अपि for अयि.
12. B D E उवट्ठिया.—B D पीठमदियं; E corrects its original पीठमदियं into पीठमद्दीयं; F पीठमद्दिअं —F पण्डिद°.
13. B °कोसिआं.—D E कोसिईं.—F पुरोकदुअ.

राजा । भगवत्यभिवादये ।

परिव्राजिका ।

महासारप्रसवयोः सदृशक्षमयोर्द्वयोः ।
धारिणीभूतधारिण्योर्भव भर्ता शरच्छतम् ॥ १९ ॥

देवी । जेदु अज्जउत्तो ।

राजा । स्वागतं देव्यै । परिव्राजिकां विलोक्य । भगवति क्रियतामासनपरिग्रहः ।

। सर्वे यथोचितमुपविशन्ति ।

राजा । भगवत्यत्रभवतोर्हरदत्तगणदासयोः परस्परेण ज्ञानसंघर्षो जातः । तदत्रभवत्या प्राश्निकपदमध्यासितव्यम् ।

परिव्राजिका । सस्मितम् । अलमलमुपालम्भेन । पत्तने विद्यमानेपि ग्रामे रत्नपरीक्षा ।

राजा । मामैवम् । पण्डितकौशिकी खलु भवती । पक्षपातिनावनयोर्हरदत्तगणदासयोरहं देवी च ।

उभौ । सम्यगाह देवः । मध्यस्था भवती नौ गुणदोषतः परिच्छेत्तुमर्हति ।

राजा । तेन हि प्रस्तूयतां विवादवस्तु ।

परिव्राजिका । देव प्रयोगप्रधानं हि नाट्यशास्त्रम् । किमत्र वाग्व्यवहारेण ।

राजा । कथं देवी मन्यते ।

---

१. जयत्वार्यपुत्रः ।

---

5. D E अ-अ°.
12. E रत्नपरीक्षणम्.

20. B omits "देवी मन्यते."

देवी । जेइ मं पुछ्छसि एदाणं विवादो एव्व ण मे रुच्चइ ।

गण० । न मां देवी समानविद्यतः परिभवनीयमनुमन्तुमर्हति ।

विदूषकः ।[2]देवि देक्खामो उरब्भसंवादं । किं मुहा वेअणदाणेण ।

देवी । णं कलहप्पिओसि ।

विदूषकः । मा चण्डि । अण्णोण्णकलहिदाणं मत्तहत्थीणं एकतरस्सिं अणिज्जिदे कुदो उवसमो ।

राजा । ननु स्वाङ्गसौष्ठवाभिनयमुभयोर्दृष्टवती भवती ।

परि० । अथ किम् ।

राजा । तदिदानीमतः किमाभ्यां प्रत्याययितव्यम् ।

परि० । एतदेव वक्तुकामास्मि ।

शिष्टा क्रिया कस्यचिदात्मसंस्था
संक्रान्तिरन्यस्य विशेषयुक्ता ।
यस्योभयं साधु स शिक्षकाणां
धुरि प्रतिष्ठापयितव्य एव ॥ १६ ॥

---

१. यदि मां पृच्छसि एतयोर्विवाद एव न मे रोचते ।
२. देवि पश्याम उरभ्रसंवादम् । किं मुधा वेतनदानेन ।
३. ननु कलहप्रियोसि ।
४. मा चण्डि । अन्योन्यकलहितयोर्मत्तहस्तिनोरेकतरस्मिन्ननिर्जिते कुत उपशमः ।

---

1. B येव्व.
2. B विद्यातः.—F परिहीनम् for परिभवनीयम्.
3. F दक्खामो.
6. A °कलिहदाणं.

विदूषकः । [1]सुदं अज्जेहिं भअवदीए वअणं । एस पिण्डिदत्थो "उवदेसदंसणेण णिण्णओ"त्ति ।

हर० । परमुचितं नः ।

गण० । देव एवं स्थितमेव ।

देवी । [2]जदा उण अमेहाविणी सिस्सा उवदेसं मलिणएइ तदा आअरिअस्स दोसो णं ।

राजा । देवि एवमुपपद्यते ।

गण० । विनेतुरद्रव्यपरिग्रह एव बुद्धिलाघवं प्रकाशयति ।

देवी । [3]कहं दाणिं । गणदासं विलोक्य । जनान्तिकम् । अलं एअस्स अज्जउत्तस्स उच्छाहकालणं मणोरहं पूरिअ । विरम णिरत्थआदो आरम्भादो ।

---

१. श्रुतमार्याभ्यां भगवत्या वचनम् । एष पिण्डितार्थ उपदेशदर्शनेन निर्णय इति ।

२. यदा पुनरमेधाविनी शिष्योपदेशं मलिनयति तदाचार्यस्य दोषो ननु ।

३. कथमिदानीम् । अलमेतस्यार्यपुत्रस्योत्साहकारणं मनोरथं पूरयित्वा । विरम निरर्थकादारम्भात् ।

---

1. D अय्येहिं.
2. A B C D E उवदेसदंसणे अ णिण्णओत्ति.
3. D परममुचितं for परमुचितं.
5. A B C D अम्मेहाविणी.
7. F एवमापतति.
8. F अद्रव्यपात्रपरिग्रहः, with the following explanation in the margin: 'द्रव्यं गुणानामाधारे भेषजे योगवित्तयोरिति यादवः ।' अयोग्यपात्रस्वीकारः ।
9. The MS all read thus: गणदासं विलोक्य । जनान्तिकम् । कहं [F जह] दाणिं । &c. The reading given in our edition is that of Tulberg's.
10. D E F अ-अ°.

विदूषकः । [1]सुट्ठु होदी भणादि । भो गणदास संगीतओवदेसं आरहिअ किं सरस्सइउवाअणमोदआइं खादअमाणस्स सुलहणिग्गहेण विवादेण ।

गण० । सत्यमयमेवार्थो देवीवचनस्य । श्रूयतामवसरप्राप्तम् ।

लब्धास्पदोस्मीति विवादभीरोस्
तितिक्षमाणस्य परेण निन्दाम् ।
यस्यागमः केवलजीविकैव
तं ज्ञानपण्यं वणिजं वदन्ति ॥ १७ ॥

विदूषकः । [2]अइरोवणीदा वो सिस्सा । ता अवरिणिट्ठिदस्स उवदेसस्स अण्णअं पआसणम् ।

गण० । अत एव निर्बन्धः ।

देवी । [3]तेण हि दुवेवि भअवदीए उवदेसं दंसह ।

परि० । नैतन्न्याय्यम् । सर्वज्ञस्याप्येकाकिनो निर्णयाभ्युपगमो दोषाय ।

---

१. सुष्ठु भवती भणति । भो गणदास संगीतकोपदेशमारभ्य किं सरस्वत्युपायनमोदकान्खादतः सुलभनिग्रहेण विवादेन ।

२. अचिरोपनीता वः शिष्या । तदपरिनिष्ठितस्योपदेशस्यान्याय्यं प्रकाशनम् ।

३. तेन हि द्वावपि भगवत्या उपदेशं दर्शयतम् ।

---

1. B D E संगीतयोव°.
2. A C D सरस्सहि° (सरस्सदि ?). —A B C D उवाअणं मोद,° E उवाअणं मोदअं.
4. A सत्यमेवायमेवार्थः.—F °प्राप्तमिदम्.
9. A B C E अचिर°, D अपरि.°
10. A C E आणअं; D आणअं.

देवी । जनान्तिकम् । [1]मूढे परिव्वाजिए किं जागतिंवि मं सुत्तं विअ करेसि । इति सासूयं परावर्तते ।

राजा । देवीं परिव्राजिकायै दर्शयति ।

परि० । विलोक्य ।

अनिमित्तमिन्दुवदने किमत्रभवतः पराङ्मुखी भवसि ।
प्रभवन्त्योपि हि भर्तृषु कारणकोपाः कुटुम्बिन्यः ॥१८॥

विदूषकः । [2]ण सकारणं एव्व । अप्पणो पक्खो रक्खिदव्वोत्ति । गणदासं विलोक्य । दिट्ठिआ कोवव्वाएण देवीए परित्तादो भवं । सुसिक्खिओवि सव्वो उवदेसेण णिवुणो होइ ।

गण० । देवि श्रूयताम् । एवं जनो गृह्णाति । तदिदानीं

विवादे दर्शयिष्यन्तं क्रियासंक्रान्तिमात्मनः ।
यदि मां नानुजानासि परित्यक्तोस्म्यहं त्वया ॥ १९ ॥

आसनादुत्तिष्ठति ।

देवी । स्वगतम् । [3]का गई । प्रकाशम् । पहवदि अज्जो सिस्सजणस्स ।

---

१. मूढे परिव्राजिके किं जाग्रतीमपि मां सुप्तामिव करोषि ।

२. ननु सकारणमेव । आत्मनः पक्षो रक्षितव्य इति । दिष्ट्या कोपव्याजेन देव्या परित्रातो भवान् । सुशिक्षितोपि सर्व उपदेशेन निपुणो भवति ।

३. का गतिः । प्रभवत्यार्यः शिष्यजनस्य ।

---

1. F omits मं.
7. C एव्वं.—B आप्पणो.
8. C कोविवएण, A B D E कोवो-वाएण.
9. A सुसुखिओ, B D E सुसुक्खियो.
14. D F अ-भो for अज्जो.

गण० । चिरमपदे शङ्कितोऽस्मि । राजानं विलोक्य । अनुज्ञातं देव्या । तदाज्ञापयतु देवः । कस्मिन्नभिनयवस्तुन्युपदेशं दर्शयिष्यामि ।

राजा । यदादिशति भगवती ।

परि० । किमपि देव्या मनसि वर्तते । तच्छङ्कितास्मि ।

देवी । [1]भण विस्सध्धं । णं प्पहविस्सं अत्तणो परिअणस्स ।

राजा । मम चेति ब्रूहि ।

देवी । [2]भअवदि भण दाणिं ।

परि० । देव चतुष्पदोद्भवं चलितमुदाहरन्ति । तत्रैकार्थसंश्रयमुभयोः प्रयोगं पश्यामः । तावता ज्ञायत एव तत्रभवतोरुपदेशान्तरम् ।

उभौ । यदाज्ञापयति भगवती ।

विदूषकः । [3]तेण हि दुवे वि गदुअ पेक्खावरए संगीदरअणं करिअ अत्तभवदो दूदं विसज्जेह ।

---

१. भण विश्रब्धम् । ननु प्रभविष्याम्यात्मनः परिजनस्य ।

२. भगवति भणेदानीम् ।

३. तेन हि द्वावपि गत्वा प्रेक्षागृहे संगीतरचनां कृत्वात्रभवते दूतं विसर्जयतम् ।

---

2. A B C D E अभिनय°.

9. The MSS. प्पहविस्ससि, except F.

13. F वग्गा (*i. e.* वर्गौ) for गदुअ.

14. F अत्तभवन्दो (=अत्रभवन्तो.)—A B C D E विसज्जेहि.

अह वा मिअङ्गसद्दो[1] एव्व णो उट्ठावइस्सदि ।

हरि० । तथा । इत्युत्तिष्ठति ।

गण० । देवीमवलोकयति ।

देवी । [2]ण हि विअअपच्चत्थिणी अहं अज्जस्स ण होमि ।

उभौ । प्रस्थितौ ।

परि० । इतस्तावदाचार्यौ ।

उभौ । परिवृत्य । इमौ स्वः ।

परि । निर्णयाधिकारे ब्रवीमि । सर्वाङ्गसौष्ठवाभिव्यक्तये विगतनेपथ्ययोः पात्रयोः प्रवेशोऽस्तु ।

उभौ । नेदमप्यावयोरुपदेश्यम् ।

[निष्क्रान्तौ ।

देवी । राजानं विलोक्य । [3]जइ इदरेसु राजकज्जेसुवि एव्वं उवाअणिउणदा अज्जउत्तस्स णं सोहणं भवे ।

राजा । देवि

अलमन्यथा गृहीत्वा न खलु मनस्विनि मया प्रयुक्तमिदम् ।
प्रायः समानविद्याः परस्परयशःपुरोभागाः ॥ २० ॥

। नेपथ्ये मृदङ्गशब्दः ।

सर्वे । कर्णं ददति ।

---

१. अथ वा मृदङ्गशब्द एव न उत्थापयिष्यति ।

२. न हि विजयप्रत्यर्थिन्यहमार्यस्य न भवामि ।

३. यदीतरेषु राजकार्येष्वप्येवमुपायनिपुणतार्यपुत्रस्य ननु शोभनं भवेत् ।

---

4. E F अ-अस्स.— A B C D E read thus : ण हि विअअपिच्चत्थिखि- णी अहं अज्जस्स । विजई होहि.

9. F विरलनेपथ्ययोः

12. B जई.—A एवं.

13. D E F अ-अ°.—F सोभणं.

परि० । हन्त प्रवृत्तं संगीतकम् । तथा ह्येषा

जीमूतस्तनिताविशङ्किभिर्मयूरैर्
उद्ग्रीवैरनुरसितस्य पुष्करस्य ।
निर्ह्रादिन्युपहितमध्यमस्वरोत्था
मायूरी मदयति मार्जना मनांसि ॥ २१ ॥

राजा । देवि सामायिका भवामः ।

देवी । आत्मगतम् । अहो अविणओ अज्जउत्तस्स ।

सर्वे । उत्तिष्ठन्ति ।

विदूषकः। अपवार्य । भो धीरं गच्छ । मा क्खु अत्तहोदी धारिणी विसंवादइस्सदि ।

राजा ।

धैर्यावलम्बिनमपि त्वरयति मां मुरजवाद्यनादोयम् ।
अवतरतः सिद्धिपथं शब्दः स्वमनोरथस्येव ॥ २२ ॥

[इति निष्क्रान्ताः सर्वे ।

॥ इति प्रथमोङ्कः ॥

---

१. अहो अविनय आर्यपुत्रस्य ।

२. भो धीरं गच्छ । मा खल्वत्रभवती धारिणी विसंवादयिष्यति ।

---

1. E संगीतम्.
4. A D E निह्रादिन्युप०.
6. A B C D F सामवायिकाः
7. D E F अ॰भ.°
12. A B D E तुमं for मा.

। ततः प्रविशति संगीतरचनायां कृतायामासनस्थः सवयस्यो राजा परिव्राजिका धारिणी विभवतश्च परिवारः ।

राजा । भगवति अत्रभवतोराचार्ययोः कतरस्य प्रथममुपदेशं द्रक्ष्यामः ।

परि° । ननु समानेपि ज्ञानवृद्धभावे वयोधिकत्वाद्गणदासः पुरस्कारमर्हति ।

राजा । तेन हि मौद्गल्य एवमेवात्रभवतोरावेद्य स्वनियोगमशून्यं कुरु ।

कञ्चुकी । यदाज्ञापयति देवः ।

[इति निष्क्रान्तः ।

गण° । प्रविश्य । देव शर्मिष्ठायाः कृतिर्लयमध्या चतुष्पदा । तस्याश्चतुर्थवस्तुकप्रयोगमेकमनाः श्रोतुमर्हति देवः ।

राजा । आचार्य बहुमानादवहितोस्मि ।

[निष्क्रान्तो गणदासः ।

राजा । जनान्तिकम् । वयस्य

नेपथ्यपरिगतायाश्चक्षुर्दर्शनसमुत्सुकं तस्याः ।
संहर्तुमधीरतया व्यवसितमिव मे तिरस्करिणीम् ॥१॥

विदूषकः । अपवार्य । हो उवट्ठिअं णअणमहु । संणिहिदं मक्खिअं च । ता अप्पमत्तो दाणिं पेक्ख ।

। ततः प्रविशत्याचार्यप्रत्यवेक्ष्यमाणाङ्गसौष्ठवा मालविका ।

---

१. भो उपस्थितं नयनमधु । संनिहिता मक्षिका च । तदप्रमत्त इदानीं पश्य ।

---

2. D परीवारः.
16. F °परिणतायाः
18. A C होउ and B D E होदु for "हो".—B णयणमहू, E F णयणमहु.
20. A B C प्रत्यवेक्षमाणा.

विदूषकः । जनान्तिकम् । [1]पेक्खदु भवं । ण हु से पडिच्छन्दादो परिहीअदि महुरदा ।

राजा । जनान्तिकम् । वयस्य

चित्रगतायामस्यां कान्तिविसंवादशङ्कि मे हृदयम् ।
संप्रति शिथिलसमाधिं मन्ये येनेयमालिखिता ॥ २ ॥

गण० । वत्से मुक्तसाध्वसा सत्त्वस्था भव ।

राजा । आत्मगतम् । अहो सर्वास्ववस्थास्वनवद्यता रूपस्य ।

दीर्घाक्षं शरदिन्दुकान्तिवदनं बाहू नतावंसयोः
संक्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव ।
मध्यः पाणिमितो नितम्बि जघनं पादावरालाङ्गुली
छन्दो नर्तयितुर्यथैव मनसःश्लिष्टं तथास्या वपुः ॥३॥

मालविका । उपवहनं कृत्वा चतुष्पदं वस्तु गायति ।

[2]दुल्लहो पिओ तस्सिं भव हिअअ णिरासं ।
अम्हो अपङ्गओ मे पफुरइ किंपि वामो ॥ ४ ॥

---

१. पश्यतु भवान् । न खल्वस्याः प्रतिच्छन्दात्परिहीयते मधुरता ।

२. दुर्लभः प्रियस्तस्मिन्भव हृदय निराशम् । अम्ब हे अपाङ्गको मे प्रस्फुरति किमपि वामः ।

---

2. A B C DE पडिहीअदि.
6. B C D E मुग्धसाध्वसा.
7. A B C D E सर्वावस्थासु.
11. A C D मनसश्लिष्टं (मनस : श्लिष्टं ?); B मनसः श्लिष्टं, corrected from मनसश्लि°; E मनसा श्लिष्टं also corrected from मनसश्लिष्टं.
12. F कपोतकं कृत्वा.
13. D E पियो.—B D E हियय.
14. B D E अपङ्गयो.—F किंवि.—F वामओ.

[1]एसो सो चिरदिट्ठो कहं उवणइदव्वो ।
णाह मं पराहीणं तुइ गणअ सतिण्हं ॥ ८ ॥

इति यथारसमभिनयति ।

विदूषकः । जनान्तिकम् । [2]भो चउप्पदं वत्थुअं दुवारं कदुअ तुइ उवक्खित्तो विअ अप्पा तत्तहोदीए ।

राजा । सखे एवमावयोर्हृदयम् । अनया खलु

जनमिममनुरक्तं विद्धि नाथेति गेये
वचनमभिनयन्त्या स्वाङ्गनिर्देशपूर्वम् ।
प्रणयगतिमदृष्ट्वा धारिणीसंनिकर्षाद्
अहमिव सुकुमारप्रार्थनाव्याजमुक्तः ॥ ९ ॥

मालविका । गीतान्ते गन्तुमिच्छति।

विदूषकः । [3]होदि चिट्ठ । किंवि विसुमरिदं कमभेदेण । तं पुच्छिस्सं दाव ।

गण॰ । वत्से स्थीयताम् । उपदेशविशुद्धा यास्यसि ।

मालविका । निवृत्य स्थिता ।

---

१ एषोऽसौ चिरदृष्टः कथमुपनेतव्यः । नाथ मां पराधीनां त्वयि गणय सतृष्णाम् ।

२. भो चतुष्पदं वस्तुकं द्वारं कृत्वा त्वय्युपक्षिप्त इवात्मा तत्रभवत्या ।

३. भवति तिष्ठस्व । किमपि विस्मृतं क्रमभेदेन तत्प्रक्ष्यामि तावत् ।

---

3. A omits the whole of “इति यथारसमभिनयति.”

5. D E उवक्खित्तो.

6 A om. “ सखे ”.

12. B D किमवि. A C E किंपि.—C D °भेदेन.—A omits “तं” before“ पुच्छिस्सं”.—B D E कम्मभेदेण (=कर्मभेदेन.)

14. A °विशुद्धा, F °शुद्धो.

15. B निवृत्य.

राजा । आत्मगतम् । अहो सर्वास्ववस्थासु चारुता शोभां पुष्यति । तथा हि

वामं संधिस्तिमितवलयं न्यस्य हस्तं नितम्बे
कृत्वा श्यामाविटपसदृशं स्रस्तमुक्तं द्वितीयम् ।
पादाङ्गुष्ठालुलितकुसुमे कुट्टिमे पातिताक्षं
नृत्तादस्याः स्थितमतितरां कान्तमृज्वायतार्धम् ॥७॥

देवी । [1]णं गोदमवअणंपि अज्जो हिअए करेदि ।

गण० । देवि मैवम् । देवप्रत्ययात्संभाव्यते सूक्ष्मदर्शिता गौतमस्य । पश्य ।

मन्दोप्यमन्दतामेति संसर्गेण विपश्चितः ।
पङ्कच्छिदः फलस्येव निकषेणाविलं पयः ॥ ८ ॥

विदूषकं विलोक्य । शृणुमो विवक्षितमार्यस्य ।

विदूषकः । गणदासं विलोक्य । [2]सक्खिणीं दाव पुच्छ । पच्छा जो मये कमभेदो लक्खिदो त्तं भणिस्सं ।

गण० । भगवति यथादृष्टमभिधीयतां दोषो वा गुणो वा ।

---

१. ननु गौतमवचनमप्यार्यो हृदये करोति ।

२. साक्षिणीं तावत्पृच्छ । पश्चाद्यो मया क्रमभेदो लक्षितस्तं भणिष्यामि ।

---

1. A B C D E सर्वावस्थासु.— F शोभान्तरम्.
11. A B C D E निकर्षेण.
13. A B C D E भिक्खुणीं for "सक्खिणीं."
14. D E तं.
15. A B C D E यथादर्शनम् for "यथादृष्टम्"

परि॰ । यथाशास्त्रं सर्वमनवद्यम् । कुतः ।

अङ्गैरन्तर्निहितवचनैः सूचितः सम्यगर्थः
पादन्यासो लयमनुगतस्तन्मयत्वं रसेषु ।
शाखायोनिर्मृदुरभिनयस्तद्विकल्पानुवृत्तौ
भावो भावं नुदति विषयाद्रागबन्धः स एव ॥ ९ ॥

गण॰ । देवः कथं मन्यते ।

राजा । गणदास वयं स्वपक्षशिथिलाभिमानाः संवृत्ताः ।

गण॰ । अथ नर्तयितास्मि ।

उपदेशं विदुः शुद्धं सन्तस्तमुपदेशिनः ।
श्यामायते न युष्मासु यः काञ्चनमिवाग्निषु ॥ १० ॥

देवी । [१]दिट्ठिआ परीक्खकाराहणेण अज्जो वड्ढइ ।

गण॰ । देवीपरिग्रहश्च मे वृद्धिहेतुः । विदूषकं विलोक्य । गौतम वदेदानीं यत्ते मनसि वर्तते ।

विदूषकः । [२]पुढमोवदेसदंसणे पुढमं बम्हणस्स पूआ इच्छिदव्वा । सा उण वो विसुमारिदा ।

१. दिष्ट्या परीक्षकाराधनेनार्यो वर्धते ।

२. प्रथमोपदेशदर्शने प्रथमं ब्राह्मणस्य पूजेष्टव्या । तस्याः पुनर्यूयं विस्मृतवन्तः ।

8. F अद्य for "अथ."

11. A B परिक्खराहणेण. — D E F अ-ओ.—A B C D E परि-क्ख°.

14. A पढमो°—B D E पूया.

15. Our MSS. सा ण वोपलक्खिदा (= सा न व उपलक्षिता). We according to G.

परि० । अहो प्रयोगाभ्यन्तरः प्राश्निकः ।

सर्वे । प्रहसिताः ।

। मालविका च स्मितं करोति ।

राजा । आत्मगतम् । आत्तसारश्चक्षुषा स्वविषयः । यदनेन

स्मयमानमायताक्ष्याः किंचिदभिव्यक्तदशनशोभि मुखम् ।
असमग्रलक्ष्यकेसरमुच्छ्वसदिव पङ्कजं दृष्टम् ॥ ११ ॥

गण० । महाब्राह्मण न खलु नेपथ्यसंगीतकमिदम् । अन्यथा कथं त्वामर्चनीयं नार्चयिष्यामः ।

विदूषकः । [1]मए णाम मुध्धचादएण विअ सुक्खघणगज्जिदे अन्तरिक्खे जलपाणं इच्छिदं ।

परि० । एवमेव ।

विदूषकः । [2]तेण हि पण्डिदपरिदोसपच्चआ मूढाजादी । जइ तत्तहोदीए सोभणं गण्हिदं तदो इमं पारितोसिअं पअच्छामि । इति राज्ञो हस्तात्कटकमाकर्षति । 'if taken in good part'

१. मया नाम मुग्धचातकेनेव शुष्कघनगर्जितेन्तरिक्षे जलपानमिष्टम् ।

२. तेन हि पण्डितपरितोषप्रत्यया मूढजातिः । यद्यत्रभवत्या शोभनं गृहीतं तदिदं पारितोषिकं प्रयच्छामि ।

1. F प्रयोगाभ्यन्तरप्रा°.
7. B F नैपथ्य°.
8. F दक्षणीयं for "अर्चनीयं."
9. B °चादयेण.—E सुक्कघण°.
12. F पण्डिअ°.—E °परितोस°.
13. F भणिदं for "गण्हिदं."—E F अत्तहोदीए.—B तदा for "तदो."
14. B F om. "इति;" C E om. the whole stage-direction beginning from "इति."

देवी । [1]चिट्ठ । गुणन्तरं अआणन्तो किंति तुमं आहरणं देसि ।

विदूषकः । [2]परकीअंति करिअ ।

देवी । आचार्यं विलोक्य । [3]अज्ज गणदास णं दंसिदोवदेसा वो सिस्सा ।

गण० । वत्से प्रतिष्ठस्वेदानीम् ।

[मालविका सहाचार्येण निष्क्रान्ता ।

विदूषकः । जनान्तिकम् । राजानं विलोक्य । [4]एत्तिओ मे विहवो भवन्तं सेविदुं ।

राजा । जनान्तिकम् । अलमलं परिच्छेदेन । अद्य हि

भाग्यास्तमयमिवाक्ष्णोर्हृदयस्य महोत्सवावसानमिव ।
द्वारपिधानमिव धृतेर्मन्ये तस्यास्तिरस्करिणीम् ॥ १२ ॥

विदूषकः । [5]साहु तुमं दरिद्दादुरो विअ वेज्जेण उवणीअमाणं ओसहं इच्छसि ।

हरदत्तः । प्रविश्य । देव मदीयमिदानीमवलोकयितुं प्रयोगं क्रियतां प्रसादः ।

---

१. तिष्ठ । गुणान्तरमजानन्किमिति त्वमाभरणं ददासि ।
२. परकीयमिति कृत्वा.
३. आर्य गणदास ननु दर्शितोपदेशा वः शिष्या ।
४. एतावान्मे विभवो भवन्तं सेवितुम् ।
५. साधु त्वं दरिद्रातुर इव वैद्येनोपनीयमानमौषधमिच्छसि ।

---

1. C अअणन्तो.—A B C D E अहिणन्देसि for "आहरणं देसि."
2. A परकरयंति; B परे केरयंति; E corrects its परकेरयंति into पख्खोयंति; C D परकेरयंति
3. D E F अ-अ.—A B C D E om. णं.
7. C अत्तिओ; D यत्तिओ, E येत्तिओ.
11. F तिरस्करणम्.
15. F adds इति after "क्रियताम्."

राजा । आत्मगतम् । अवसितो दर्शनार्थः । प्रकाशम् । दाक्षिण्यमवलम्ब्य हरदत्त पर्युत्सुका एव वयम् ।

हर० । अनुगृहीतोस्मि ।

|| नेपथ्ये ||

वैतालिकः । जयतु देवः । उपारूढो मध्यमह्नः सविता । तथा हि ।

पत्त्रच्छायासु हंसा मुकुलितनयना दीर्घिकापद्मिनीनां
सौधान्यत्यर्थतापाद्वलभिपरिचयद्वेषिपारावतानि ।
बिन्दूत्क्षेपान्पिपासुः परिपतति शिखी भ्रान्तिमद्वारियन्त्रं
सर्वैरुस्रैः समग्रैस्त्वमिव नृपगुणैर्दीप्यते सप्तसप्तिः ॥१३॥

विदूषकः । [१]अवि हा अवि हा । ण्हाणभोअणवेला संवुत्ता अत्तहोदो । उइदवेलादिक्कमे चिइस्सआ दोसं उदाहरन्ति ।

राजा । हरदत्त किं भणसि ।

हर० । नास्त्यवकाशो मद्वचनस्य ।

राजा । हरदत्तं विलोक्य । तेन हि त्वदीयमुपदेशं श्वो वयं द्रक्ष्यामः । विश्राम्यतु भवान् ।

हर० । यदाज्ञापयति देवः ।

[इति निष्क्रान्तः ।

---

१. अपि हा अपि हा । स्नानभोजनवेला संवृत्तात्रभवतः । उचितवेलातिक्रमे चिकित्सका दोषमुदाहरन्ति ।

---

5. C उपारूढो मध्यः सविता.
11. A C do not repeat “अवि हा.” —E अत्तहोदे.
12. B C D E चिइस्सया.
16. B D विश्रम्यतु.

देवी । [1]णिवुत्तेदु अज्जउत्तो मज्झणविहिं ।

विदूषकः । [2]होदि विसेसेण पाणभोअणं तुवरेदु ।

परि० । उत्थाय । स्वस्ति भवते ।

[सपरिजनया देव्या सह निष्क्रान्ता ।

विदूषकः । [3]भो ण केवलं रूवे सिप्पेवि अहुदीआ मालविआ ।

राजा ।

अव्याजसुन्दरीं तां विज्ञानेन ललितेन योजयता ।
परिकल्पितो विधात्रा बाणः कामस्य विषदिग्धः ॥१४॥

किं बहुना । चिन्तयितव्योस्मि ।

विदूषकः ।[4]भवदावि अहं । दिढं विपणिकन्दू विअ मे उदरब्भन्तरं ढज्जइ ।

राजा । एवमेव । भवान्सुहृदर्थे त्वरताम् ।

---

१. निर्वर्तयत्वार्यपुत्रो मध्याह्नविधिम् ।

२. भवति विशेषेण पानभोजनं त्वर्यताम् ।

३. भो न केवलं रूपे शिल्पेप्यद्वितीया मालविका ।

४. भवताप्यहम् । दृढं विपणिकन्दुरिव म उदराभ्यन्तरं दह्यते ।

---

1. A C णिवुत्तोदु; B D णिवत्तेदु, F णिव्वंददु.—D E F अ-अ°.
5. A C D E F सिप्पे अ for "सिप्पेवि."
12. B ढढज्जई.
13. A B C D E त्वरते.

विदूषकः । गेहीदक्खणोम्हि । किं दु मेहोवरुध्धजोण्हा विअ पराहीणदंसणा तत्तभोदी । भवंवि सूणोपरिचरो विहंगमो विअ आमिसलोलुवो भीरुओ अ अच्चादुरो भविअ कज्जसिध्धिं पथ्थयन्तो मे रुच्चइ ।

राजा । सखे कथं नातुरो भविष्यामि । यदा

सर्वान्तःपुरवनिताव्यापारप्रतिनिवृत्तहृदयस्य ।
सा वामलोचना मे स्नेहस्यैकायनीभूता ॥ १९ ॥

[इति निष्क्रान्तौ ।

॥ इति द्वितीयोऽङ्कः ॥

---

१. गृहीतक्षणोऽस्मि । किं तु मेघोपरुद्धज्योत्स्नेव पराधीनदर्शना तत्रभवती । भवानपि शूनोपरिचरो विहंगम इवामिषलोलुपो भीरुकश्चात्यातुरो भूत्वा कार्यसिद्धिं प्रार्थयन्मे रोचते ।

---

1. A B C D E गहिदक्खिणो.—B °जोन्हा.–A B C D E मेहावरुध्ध°.

6. B C °व्यापारं.

8. B इति निष्क्रान्ताः सर्वे ; E निष्क्रान्ताः सर्वे.

। ततः प्रविशति परिव्राजिकायाः परिचारिका ।

परिचारिका । [१]आणत्तम्हि भअवदीए । जहा समाधिमदिए देवस्स सभाअणथ्थं बीजपूरअं गेण्हिअ आअच्छेत्ति । ता जाव प्पमदवणपालिअं महुअरिअं अण्णेस्सामि । परिक्रम्यावलोक्य च । एसा तवणीआसोअं ओलोअन्ती महुअरिआ चिट्ठइ । जाव णं संभावेमि ।

। ततः प्रविशत्युद्यानपालिका ।

प्रथमा । उपसृत्य । [२]महुअरिए अवि सुहो दे उज्जाणवणव्वावारो ।

द्वितीया । [३]अम्हो समाहिमदिआ । सहि साअदं दे ।

समाधिमतिका । [४]हला भअवदी आणवेदि । अरित्तपाणिणा अम्हारिसजणेण अथ्थपइ दक्खिदव्वो । ता बीजपूरएण सुस्सूसिदुं इछ्छामित्ति ।

---

१. आज्ञप्तास्मि भगवत्या । यथा समाधिमतिके देवस्य सभाजनार्थं बीजपूरकं गृहीत्वागच्छेति । तत्तावत्प्रमदवनपालिकां मधुकरिकामन्वेष्यामि । एषा तपनीयाशोकमालोकयन्ती मधुकरिका तिष्ठति । तावदिमां संभावयामि ।

२. मधुकरिके अपि सुखस्त उद्यानवनव्यापारः ।

३. अहो समाधिमतिका । सखि स्वागतं ते ।

४. हला भगवत्याज्ञापयति । अरिक्तपाणिनास्मादृशजनेनार्थपतिर्द्रष्टव्यः । तद्बीजपूरकेण शुश्रूषितुमिच्छामीति ।

---

2. B अणत्तंम्हि, A C D E अणत्तम्हि.-F om. 'जहा समाधिमदिए.'

4. B महुआरिआं.-A B C D E अण्णेसामि.

5. A मधुअरिआ; B महुआरिआ.

6. A चिट्ठई.—B संभवेमि.

8. F सुविहिदो (=सुविहितः) for "सुहो."—B ०वणवाव्वारो.—F om. ०व्वण०.

9. F समाहुदिआ (= समाभृतिका) here and everywhere else throughout the work.

10. A आणव्वेदि.

11. B अम्मोरिस°.—B अथ्थपई.—E देक्खि°.

मधुकरिका । णं संणिहिदं बीजपूरअं । कहेहि दुवेणं संगीदओवदेसणिमित्तं अण्णोण्णसंघरिसिदाणं णट्टाअरिआणं उवदेसं देक्खिअ कदरो भअवदीए पसंसिदोत्ति ।

समाधि० । [2]दुवेवि किल आअमिणो पओअणिउणा अ । किं दु सिस्सागुणविसेसेण गणदासो उण्णमिदोवदेसो ।

मधु० । [3]अह मालविआगअं कोलीणं किंति सुणीअदि ।

समाधि० । [4]बलियं खु साहिलासो तस्सिं भट्टा । केवलं देवीए धारिणीए चित्तं रक्खिदुं अहिलासदंसणे पहुत्तणं ण दंसेदि ।

---

१. ननु संनिहितं बीजपूरकम् । कथय द्वयोः संगीतकोपदेशनिमित्तमन्योन्यसंघर्षिणोर्नाट्याचार्ययोरुपदेशं दृष्ट्वा कतरो भगवत्या प्रशंसित इति ।

२. द्वावपि किलागमिनौ प्रयोगनिपुणौ च । किं तु शिष्यागुणविशेषेण गणदास उन्नमितोपदेशः ।

३. अथ मालविकागतं कौलीनं किमिति श्रूयते ।

४. बलवत्खलु साभिलाषस्तस्यां भर्ता । केवलं देव्या धारिण्याश्चित्तं रक्षितुमभिलाषदर्शने प्रभुतां न दर्शयति ।

---

1. B C मधुकारिका.
2. A °संघरिसिन्दाणं
3. F णट्टाचारिआणं.—D E देक्खिय.—A वसंसिदोत्ति
4. F पओग°.
5. F गणदासे उण्णमिदो उवदेसो.
6. A B C D E किंपि.—for "किंति" A B C D E read thus :—
"मधु० । अह मालविआगअं कोलीणं किंपि सुणीअदि । मालविआए किल साहिलासो भट्टा केवलं देवीए धारिणीए चित्तं रक्खिदुं अहिलासदंसणे पहुत्तणं ण दंसेदि ।"
समाधि० । बलियं खु साहिलासो तस्सिं भट्टा । . . . . . . मं ।
7. A C देविए.
8. B धारणीए.—F अहिलासं ण दंसेदि.

wh. has been enjoyed & thrown away

मालविआवि इमेसु दिअहेसु अणुभूदमुत्ता विअ मालदीमाला मिलायमाणा लक्खीअदि । अदो वरं ण आणे । विसज्जेहि मं ।

मधु० । [1]एअं साहावलम्बिणं बीजपूरअं गेण्ह ।

समाधि० । नाट्येन गृहीत्वा । [2]हला तुमंवि इदो विपुलदरं साहुजणसुस्सूसाए फलं लहेहि ।

मधु० । प्रस्थिता । [3]सहि समं जेव्व गच्छामो । अहंवि इमस्स चिराअमाणकुसुमुग्गमस्स तवणीआसोअस्स दोहलणिमित्तं देवीए विण्णवेमि । *cf. Raghu 8.61.* *signs*

समाधि० । [4]जुज्जइ । अहिआरो क्खु तुह ।

[इति निष्क्रान्ते ।

। प्रवेशकः ।

मालविकाप्येतेषु दिवसेष्वनुभूतमुक्तेव मालतीमाला म्लायमाना लक्ष्यते । अतः परं न जाने । विसर्जय माम् ।

१. एतच्छाखावलम्बि बीजपूरकं गृहाण ।

२. हला त्वमपीतो विपुलतरं साधुजनशुश्रूषायाः फलं लभस्व ।

३. सखि सममेव गच्छावः । अहमप्येतस्य चिरायमाणकुसुमोद्गमस्य तपनीयाशोकस्य दोहदनिमित्तं देव्यै विज्ञापयामि ।

४. युज्यते । अधिकारः खलु तव ।

---

2. A B C D E जाणे for "आणे."
3. B मां.
4. A E साहावलम्बिदं.
5. F om. इदो, and reads पेसलतरं for "विपुलदरं."
6. A C सुस्सुसाए.
7. A B C ज्जेव, F एव्व.
8. D तवणीआहोअस्स.
9. A C देविए विण्णेवेमि. E also reads विण्णेवेमि.
10. B तुइ for "तुह."—F om. क्खु.

। ततः प्रविशति कामयमानावस्थो राजा विदूषकश्च ।

राजा । आत्मानं विलोक्य ।

शरीरं क्षामं स्यादसति दयितालिङ्गनसुखे
भवेत्सास्रं चक्षुः क्षणमपि न सा दृश्यत इति ।
तया सारङ्गाक्ष्या त्वमसि न कदाचिद्विरहितं
प्रसक्ते निर्वाणे हृदय परितापं वहसि किम् ॥ १ ॥

विदूषकः । [1]अलं भवदो धीरदं उज्झिअ परिदेविएण । दिट्ठा क्खु मए तत्तहोदीए मालविआए प्पिअसही बउलावलिआ । सुणाविदा अ तं अत्थं भवदा जो संदिट्ठो ।

राजा । ततः किमुक्तवती ।

विदूषकः । [2]विण्णवेहि भट्टारं । अणुगहीदाम्हि इमिणा णिओएण । किं दु सा तवस्सिणी देवीए अहिअदरं रक्खिअमाणा णाअरक्खिदो मणी विअ ण सुहं समासादइदव्वा । तहवि घडइस्संति ।

१. अलं भवतो धीरतामुज्झित्वा परिदेवितेन । दृष्टा खलु मया तत्रभवत्या मालविकायाः प्रियसखी वकुलावलिका । श्राविता च तमर्थं भवता यः संदिष्टः ।
२. विज्ञापय भर्तारम् । अनुगृहीतास्म्यनेन नियोगेन । किं तु सा तपस्विनी देव्याधिकतरं रक्ष्यमाणा नागरक्षितो मणिरिव न सुखं समासादयितव्या । तथापि घटिष्य इति ।

7. B उइझोअ.
8. A C D पिअ°.
11. A विणवेहि.—A B C D E अणुगेण्हिदम्हि.
12. F सादरं for "अहिअदरं."
13. A C D णाअरक्खिओ.—A B C D वीअ.—A B C D E read विअ मणी, and add अहं ण्णिहं रण्णा (= अहर्निशम्, राज्ञा)
14. D समासादयिदव्वा.—B घटइस्सं°.

राजा। भगवन्संकल्पयोने प्रतिबन्धवस्त्वपि विषयेष्वभिनिवेश्य तथा प्रहरसि यथा जनोयं कालान्तरक्षमो न भवति। सविस्मयम्।

क्व रुजा हृदयप्रमाथिनी क्व च ते विश्वसनीयमायुधम्।
मृदुतीक्ष्णतरं यदुच्यते तदिदं मन्मथ दृश्यते त्वयि॥८॥

विदूषकः। णं भणामि तस्सिं साहणिज्जे कज्जे किदो उवाओवक्खेवोत्ति। ता पज्जवत्थावेदु अत्ताणं तत्तभवं।

राजा। अथेमं दिवसशेषमुचितव्यापारपराङ्मुखेन चेतसा क्व नु खलु यापयामि।

विदूषकः। णं भवं अज्ज एव्व वसन्दपुढमावदारसूअआणि रत्तकुरबआणि उवाअणं पेसिअ णववसन्तावदारावदेसेण इरावदीए णिउणिआमुहेण पत्थिदो। इच्छामि अज्जउत्तेण सह डोलाहिरोहणं अणुहोदुंति। भवदावि से पडिण्णादं। ता पमदवणं जेव्व गच्छम्ह।

---

१. ननु भणामि तस्मिन्साधनीये कार्ये कृत उपायोपक्षेप इति। तत्पर्यवस्थापयत्वात्मानं तत्रभवान्।

२. ननु भवानद्यैव वसन्तप्रथमावतारसूचकानि रक्तकुरबकाण्युपायनं प्रेष्य नववसन्तावतारापदेशेनेरावत्या निपुणिकामुखेन प्रार्थितः। इच्छाम्यार्यपुत्रेण सह दोलाधिरोहणमनुभवितुमिति। भवताप्यस्यै प्रतिज्ञातम्। तत्प्रमदवनमेव गच्छावः।

---

1. A B C D E प्रतिबन्धवस्तुष्वपि.
6. D उवाआवक्खेवो corrected from उवाओवक्खेवो.
9. F om. नु.
10. B D° सुअआणि.
11. A B C D °कुरवयाणि.—B पेसीअ.
12. A C D णिउणीआ°.—Our MSS इच्छेअं. We with G.
13. D E F अ-अ°.—A B C D भवदापि.
14. A पडिणादं—A B C ज्जेव.—B D E F गच्छम्ह.

राजा । न क्षमामिदम् ।

विदूषकः । [1]कहं विअ ।

राजा । वयस्य निसर्गनिपुणाः स्त्रियः । कथं मामन्यसंक्रान्तहृदयमुपलालयन्तमपि ते सखी न लक्षयिष्यति । अतः पश्यामि

उचितः प्रणयो वरं विहन्तुं बहवः खण्डनहेतवो हि दृष्टाः ।
उपचारविधिर्मनस्विनीनां न तु पूर्वाभ्यधिकोपि भावशून्यः ॥ ३ ॥

विदूषकः । [2]णारुहदि भवं अन्तेउरपडिट्ठिदं दाक्खिण्णं एक्कपदे पिट्ठदो कादुं ।

राजा । विचिन्त्य । तेन हि प्रमदवनमार्गमादेशय ।

विदूषकः । [3]इदो इदो भवं ।

। उभौ परिक्रामतः ।

विदूषकः । [4]वसन्दो किल एदाहिं पवणचलिदाहिं पल्लवङ्गुलीहिं तुवरेदि विअ भवन्तं एदं पमदवणं पविसेत्ति ।

---

१. कथमिव ।
२. नार्हति भवानन्तःपुरप्रतिष्ठितं दाक्षिण्यमेकपदे पृष्ठतः कर्तुम् ।
३. इत इतो भवान् ।
४. वसन्तः किलैताभिः पवनचलिताभिः पल्लवाङ्गुलीभिस्त्वरयतीव भवन्तमेतत्प्रमदवनं प्रविशेति ।

---

7. A B C E ननु for "नतु."
9. A D नारुहादि.—E °पडिट्ठिदं.—A B C D E add जणं after दक्खिणं which they read for "दक्खिण्णं."
15. A B C D E तुवरावेदि.—B पविसेति.

राजा । स्पर्शं निरूप्य । अभिजातः किल वसन्तः ।

सखे पश्य

आमत्तानां श्रवणसुभगैः कूजितैः कोकिलानां
सानुक्रोशं मनसिजरुजः सह्यतां पृच्छतेव ।
अङ्गे चूतप्रसवसुरभिर्दक्षिणो मारुतो मे
सान्द्रस्पर्शः करतल इव व्यापृतो माधवेन ॥ ४ ॥

विदूषकः । ¹पविस णिव्वुदिलाहाअ ।

। उभौ प्रविशतः ।

विदूषकः । ²भो वअस्स अवधाणेण दाव दिट्ठिं देहि । एदं खु भवन्तं विलोहइदुकामाए पमदवणलच्छीए जुवईवेसलज्जाइत्तअं वसन्तकुसुमणेवथ्थअं गहिअं ।

राजा । ननु विस्मयादवलोकयामि ।

रक्ताशोकरुचा विशेषितगुणो बिम्बाधरालक्तकः
प्रत्याख्यातविशेषकं कुरबकं श्यामावदातारुणम् ।
आक्रान्ता तिलकक्रियापि तिलकैर्लीनद्विरेफाञ्जनैः
सावज्ञेव मुखप्रसाधनविधौ श्रीर्माधवी योषिताम् ॥५॥

---

१. प्रविश निर्वृतिलाभाय ।

२. भो वयस्य अवधानेन तावद्दृष्टिं देहि । एतत्खलु भवन्तं विलोभयितुकामया प्रमदवनलक्ष्म्या युवतिवेषलज्जयितृकं वसन्तकुसुमनेपथ्यं गृहीतम् ।

---

1. F reads रूपयित्वा, and never puts नि before रूपम् used in stage-directions occurring subsequently.

4. B सह्यते.

7. AC णिउ°.

9. A E वयस्य.—B अवहाणेण.

10. A B C D E भवन्तं विभ लोहइदुकामाए.

11. A B C D E °लज्जावइत्तअं.—A B C D E गाहिअं.

। उभावुद्यानशोभां निर्वर्णयतः ।

। ततः प्रविशति पर्युत्सुका मालविका ।

मालविका । ¹अणभिण्णादहिअअं भट्टारं अभिलसन्दी अप्पणोवि दाव लज्जेमि । कुदो विहवो सिणिध्धअणस्स वुत्तन्तं आचक्खिदुं । ण आणे अप्पडिआरगुरुअं वेअणं केत्तिअं कालं मअणो मं णइस्सदित्ति । कतिचित्पदानि गत्वा । कहिं णु पत्थिदम्हि । विचिन्त्य । आम् संदिट्ठम्हि देवीए । गोदमचावलादो डोलापरिभट्टा ण सक्कुणोमि अहं चलणे चालइदुं । तुमं दाव तवणीआसोअस्स दोहलं णिव्वत्तेहि । जदि सो पञ्चरत्तब्भन्तरे कुसुमं दंसेइ तदोहं– । अन्तरा निःश्वस्य । अहिलासपूरइत्तअं पसादं दाइस्संति । दाव णिओअभूमिं पुढमं गदा होमि । जाव अणुपदं मह चलणालंकारहत्थाए बउलावलिआए आअन्तव्वं परिदेविस्सं दाव विस्सध्धं मुहुत्तअं ।

१° अनभिज्ञातहृदयं भर्तारमभिलषन्त्यात्मनोपि तावल्लज्जे । कुतो विभवः स्निग्धजनस्य वृत्तान्तमाख्यातुम् । न जानेपरिहारगुर्वीं वेदनां कियन्तं कालं मदनो मां नेष्यतीति । क्व नु प्रस्थितास्मि । आम् संदिष्टास्मि देव्या । गौतमचापलाद्दोलापरिभ्रष्टा न शक्नोम्यहं चरणौ चालयितुम् । त्वं तावत्तपनीयाशोकस्य दोहदं निर्वर्तय । यदि स पञ्चरात्राभ्यन्तरे कुसुमं दर्शयति तदाहम्—अभिलाषपूरकं प्रसादं दास्यामीति । तावन्नियोगभूमिं प्रथमं गता भवामि । यावदनुपदं मम चरणालंकारहस्तया वकुलावलिकयागन्तव्यं परिदेविष्ये तावद्विश्रब्धं मुहूर्तकम् ।

1. A C वर्णयत:.
3. F अणहिण्णादं°.—B भट्टारअं—A B °लसन्ति.
4. A B C D E add सहो between "सिणिध्ध" and "अणस्स."
5. B D E आअक्खिदुं.—D अपडियार°; E अपडिहार.°
10. A C D णिवत्तेहि; E णिवट्टेहि.
11. F पदं पसादे for पसादं.
14. B इयन्तव्वं; C D इअन्तव्वं—A B C परिदेव्विसं.— A B C D वीसध्धं.

परिक्रामति ।

विदूषकः । [१]ही ही इअं सीधुपाणुव्वेजिअस्स मच्छण्डिआ उवणदा ।

राजा । अयि किमेतत् ।

विदूषकः । [२]एसा क्खु णादिपज्जत्तवेसा उस्सुअवण्णा विअ एआइणी मालविआ अदूरे वट्टइ ।

राजा । सहर्षम् । कथं मालविका ।

विदूषकः । [३]अह इं ।

राजा । शक्यमिदानीं जीवितमवलम्बितुम् ।
त्वदुपलभ्य समीपगतां प्रियां
हृदयमुच्छ्वसितं मम विक्लवम् ।
तरुवृतां पथिकस्य जलार्थिनः
सरितमारसितादिव सारसात् ॥ ६ ॥

अथ क्व तत्रभवती ।

विदूषकः । [४]एसा णं तरुराइमज्झादो णिक्कन्दा इदो ज्जेव्व आअच्छदि ।

राजा । वयस्य पश्याम्येनाम् ।

---

१. ही ही इयं सीधुपानोद्वेजितस्य मत्स्यण्डिकोपनता ।

२. एषा खलु नातिपर्याप्तवेषोत्सुकवर्णेवैकाकिनी मालविकादूरे तिष्ठति ।

३. अथ किम् ।

४. एषा ननु तरुराजिमध्यान्निष्क्रान्तेत एवागच्छति ।

---

2. A C D मत्सण्डिआ.
15. F णिग्गदा.—D जेव्व.
16. D E F आअच्छइ.
17. A om. "वयस्य."

विपुलं नितम्बबिम्बे मध्ये क्षामं समुन्नतं कुचयोः ।
अत्यायतं नयनयोर्मम जीवितमेतदायाति ॥ ७ ॥

सखे पूर्वस्मादवस्थान्तरमारूढा तत्रभवती । तथा हि ।

शरकाण्डपाण्डुगण्डस्थलेयमाभाति परिमिताभरणा ।
माधवपरिणतपत्त्रा कतिपयकुसुमेव कुन्दलता ॥८॥

विदूषकः । [1]एसावि भवं विअ मअणवाहिणा परिमिट्ठा भविस्सदि ।

राजा । सौहार्दमेवं पश्यति ।

मालविका । [2]अअं सो ललिअदोहलापेक्खी अगहीदकुसुमणेवथो उक्कण्ठिदं मं अणुकरेइ असोओ । जाव से पछाअसीअले सिलापट्टे णिसण्णा भविअ अत्ताणं विणोदेमि ।

विदूषकः । [3]सुदं भवदा उक्कण्ठिदम्हित्ति तत्तहोदीए मन्तिदं ।

राजा । नैतावता भवन्तं प्रसन्नतर्कं मन्ये । कुतः

वोढा कुरबकरजसां किसलयपुटभेदसीकरानुगतः ।
अनिमित्तोत्कण्ठामपि जनयति मनसो मलयवातः ॥९॥

मालविका । उपविष्टा ।

---

१. एषापि भवानिव मदनव्याधिना परिमृष्टा भविष्यति ।

२. अयं स ललितदोहदापेक्ष्यगृहीतकुसुमनेपथ्य उत्कण्ठितां मामनुकरोत्यशोकः । तावदस्य प्रच्छायशीतले शिलापट्टे निषण्णा भूत्वात्मानं विनोदयामि ।

३. श्रुतं भवतोत्कण्ठितास्मीत्यत्रभवत्या मन्त्रितम् ।

---

9. A C D °दोहलापेखो.—B अग्गहीद°.—A C D E °णेवछो.

10. B °करेदि.

11. F पछाय°.

13. A तत्तहोदिए.

14. F नैतावता [भवतः ?] प्रसन्नतर्कतां [मन्ये.

राजा । वयस्य इतस्तावदावां लतान्तरितौ भवावः ।

विदूषकः । [१]इरावदीं विअ दूरे समत्थेमि ।

राजा । न हि कमलिनीं दृष्ट्वा ग्राहमवेक्षते मतंगजः । विलोकयन्स्थितः ।

मालविका । [२]हिअअ णिप्फलादो मणोरहादो विरम । किं मं आआसअसि ।

विदूषकः । राजानमवेक्षते ।

राजा । प्रिये पश्य वामतां स्नेहस्य ।

औत्सुक्यहेतुं विवृणोषि न त्वं
तत्त्वावबोधैकरसो न तर्कः ।
तथापि रम्भोरु करोमि लक्ष्यम्
आत्मानमेषां परिदेवितानाम् ॥ १० ॥

विदूषकः । [३]संपदं भअदो णिस्संसओ भविस्सदि । एसा अप्पिअमअणसंदेसा विवित्ते णं बउलावलिआ उवट्ठिदा ।

राजा । अपि स्मरेदस्मदभ्यर्थनाम् ।

---

१. इरावतीमिव दूरे समर्थयामि ।

२. हृदय निष्फलान्मनोरथाद्विरम । किं मामायासयसि ।

३. सांप्रतं भवतो निःसंशयो भविष्यति । एषार्पितमदनसंदेशा विविक्ते ननु बकुलावलिकोपस्थिता ।

---

2. B समत्थेम्हि.

5. F णिरवलम्बादो for "णिप्फलादो."—A C अआसअसि.

8. A B C D E read आत्मगतम् before "प्रिये पश्य" &c.

13. E F भवदो.—E णिःसंसयो; F णिःसंसअं.—A C add त्ति after "भविस्सदि." [उपट्ठिआ.

14. F एआ (= एका) for "णं."—E

16. A C अयि for "अपि."

विदूषकः । [१]किं दाणिं एसा दासीए सुदा दाव तुह गुरुअं संदेसं विसुमरेदि । अहंवि दाणिं एदं ण विसुमरेमि ।

। प्रविश्य चरणालंकारहस्ता बकुलावलिका ।

बकुलावलिका । [२]अवि सुहं सहीए ।

मालविका । [३]अम्हो बउलावलिआ उवट्ठिआ । सहि सागदं दे । उवविस ।

बकुलावलिका । [४]हला तुमं दाणिं दोहलकरणजोग्गदाए णिउत्ता । ता एक्कं दे चलणं उवणेहि । जाव णं सालत्तअं सणेउरं करेमि ।

मालविका । आत्मगतम् । [५]हिअअ अलं सुहिददाए अअं विहवो उवट्ठिदोत्ति । कहं दाणिं अत्ताणं मोएअं । अह वा एदं एव्व मह मिच्चुमण्डणं भविस्सदि ।

---

१ किमिदानीमेषा दास्याः सुता तावत्तव गुरुं संदेशं विस्मरति । अहमपीदानीमेतं न विस्मरामि ।

२. अपि सुखं सख्याः ।

३. अहो बकुलावलिकोपस्थिता । सखि स्वागतं ते । उपविश ।

४. हला त्वमिदानीं दोहदकरणयोग्यतया नियुक्ता । तदेकं ते चरणमुपनय । तावदेतं सालक्तकं सनूपुरं करोमि ।

५. हृदय अलं सुखिततयायं विभव उपस्थित इति । कथमिदानीमात्मानं मोचयेयम् । अथ वैतदेव मम मृत्युमण्डनं भविष्यति ।

---

1. A C दाणीं.—F om. "तुह."
2. F om. "एदं."
4. A C D सहिए.
5. A C E उवट्ठिआ; B उवट्ठिदा.—B स्सागदं.
6. A C D E उपविस.
7. B दाणीं.—F दोहलकरणे जोग्गदाए.
8. F सालत्तअणेउरं.

बकुलावलिका । [1]किं विआरेसि । उस्सुआ क्खु इमस्स तवणीआसोअस्स कुसुमसमुग्गमे देवी ।

राजा । कथमशोकदोहदनिमित्तोयमारम्भः ।

विदूषकः । [2]किं खु ण जाणासि अकालणादो देवी इमं अन्तेउरणेवथ्थेण ण संजोअइस्सदित्ति ।

मालविका । पादमुपहरति । [3]हला मरिसेहि दाणिं ।

बकुलावलिका । [4]अयि सरीरंसि मे । नाट्येन चरणसंस्कारमारभते ।

राजा ।

चरणान्तनिवेशितां प्रियायाः
सरसां पश्य वयस्य रागरेखाम् ।
प्रथमामिव पल्लवप्रसूतिं
हरदग्धस्य मनोभवद्रुमस्य ॥ ११ ॥ *i.e. Love as it were a tree.*

विदूषकः । [5]चलणाणुरूवो क्खु तत्तहोदीए अहिआरो उवक्खित्तो । *i.e. "her foot is equal to the occasion."*

राजा । सम्यगभिहितं भवता ।

---

१. किं विचारयसि । उत्सुका खल्वस्य तपनीयाशोकस्य कुसुमसमुद्गमे देवी ।

२. किं खलु न जानास्यकारणाद्देवीमामन्तःपुरनेपथ्येन न संयोजयिष्यतीति ।

३. हला मर्षयेदानीम् ।

४. अयि शरीरमसि मे ।

५. चरणानुरूपः खलु तत्रभवत्या अधिकार उपक्षिप्तः ।

---

1. D E विचिआरेसि.—D F उस्सिआ.

2. A C कुसुमग्गमे.

4. A B C D E insert णु after "किं" and before "क्खु."

5. B D E संजोअइसिदित्ति.

6. A B C D E दाणीं.

7. Our MSS चरणमलंकरोति. We according to G.

13. A चलणाणुरूपो.—A C अभिहारो.

नवकिसलयरागेणाग्रपादेन बाला
स्फुरितनखरुचा द्वौ हन्तुमर्हत्यनेन ।
अकुसुमितमशोकं दोहदापेक्षया वा
प्रणिहितशिरसं वा कान्तमार्द्रापराधम् ॥ १२ ॥

विदूषकः । [1]पारइस्ससि अत्तहोदीए अवरध्धुं । ("You will have many chances to offend" — a Prâkrit word.)

राजा । परिगृहीतं वचः सिद्धिदर्शिनो ब्राह्मणस्य । ("I accept the omen.")

। ततः प्रविशत्युन्मत्तवेषेरावती चेटी च ।

इरावती । [2]हञ्जे णिउणिए सुणामि बहुसो मदो किल इत्थिआजणस्स विसेसमण्डणंति । अवि सच्चो लोअवादो ।

निपुणिका । [3]पुढमं (μὲν) लोअवादो एव्व । अज्ज (δὲ) सच्चो संवुत्तो ।

इरावती । [4]अलं सिणेहभणिदेण । कुदो दाणिं अवगदं डोलाघरअं पुढमं गदो भट्टेत्ति ।

निपुणिका । [5]भट्टिणीए अखण्डिदादो पणआदो ।

इरावती । [6]अलं सेवाए । मज्झत्थदं गेण्हिअ भणाहि ।

---

१. पारयिष्यस्यत्रभवत्या अपराद्धुम् ।
२. हञ्जे निपुणिके शृणोमि बहुशो मदः किल स्त्रीजनस्य विशेषमण्डनमिति । अपि सत्यो लोकवादः ।
३. प्रथमं लोकवाद एव । अद्य सत्यः संवृत्तः ।
४. अलं स्नेहभणितेन । कुत इदानीमवगतं दोलागृहं प्रथमं गतो भर्तेति ।
५. भट्टिन्याः अखण्डितात्प्रणयात् ।
६. अलं सेवया । मध्यस्थतां गृहीत्वा भण ।

---

8. A हञ्ज.
9. F अअं for "अवि."
11. D संउत्तो.
12. B दाणीं.— A B C D E वुत्तन्तो आगमिदो for "अवगदं."
14. B पणगादो; E पणअदो.

निपुणिका । ¹वसन्दोवाअणलोलुवेण अज्जगोदमेण कहिदं । तुवरदु भट्टिणी ।

इरावती । अवस्थासदृशं परिक्रम्य । ²हला मदेण मिलाअमाणं अत्ताणं अज्जउत्तदंसणे हिअअं तुवरेदि । चलणा उण ण मग्गे पसरन्दि ।

निपुणिका । ³णं पत्तम्ह डोलाघरअं ।

इरावती । ⁴णिउणिए ण उण एत्थ अज्जउत्तो दीसइ ।

निपुणिका । ⁵ओलोएदु । भट्टिणीए परिहासणिमित्तं कहिंवि गुम्मे गूढेण भट्टिणा होदव्वं । अम्हेवि इमं पिअङ्गुलदापरिक्खित्तं असोअसिलापट्टअं पविस्सम्ह ।

---

१. वसन्तोपायनलोलुपेनार्यगौतमेन कथितम् । त्वरतां भट्टिनी ।
२. हला मदेन म्लायन्तमात्मानमार्यपुत्रदर्शने हृदयं ~~त्वरते~~ । चरणौ पुनर्न मार्गे प्रसरतः । त्वरयति
३. ननु प्राप्ते स्वो दोलागृहकम् ।
४. निपुणिके न पुनरत्रार्यपुत्रो दृश्यते ।
५. ?अवलोक्यताम् । भट्टिन्याः परिहासनिमित्तं कुत्रापि गुल्मे गूढेन भर्त्रा भवितव्यम् । आवामपीमं प्रियंगुलतापरिक्षिप्तमशोकशिलापट्टकं प्रविशावः ।

---

1. D E F अ-अ°.
2. A तुवराइदु; C तुवरइदु corrected from an original तुवराइदु.
4. A आत्ताणं.—D E F अ-अ°.
5. A E have each their original ओसज्जन्ति corrected into ओसप्पन्ति; B C D ओसज्जन्ति (= अवसज्जन्ति).
6. B पतम्ह.
7. A C एथ्थं.—D E F अ-अ°.—F दिसइ.
8. A C आलोयदु.
9. E गूढे for "गूढेण."
10. A B C °परिक्खित्ते. — B पविसम्ह.

इरावती । तथा करोति ।

निपुणिका । परिक्रम्य विलोक्य । [1]ओलोअदु भट्टिणी । चुदङ्कुरं विचिण्णन्दीणं अम्हाणं पिपीलिआदंसणं ।

इरावती । [2]किं विअ एदं ।

निपुणिका । [3]ऐसा असोअपाअवछ्छाआअं मालविआए बउलावलिआ चलणालंकारं णिव्वट्टेइ ।

इरावती । शङ्कां रूपयित्वा । [4]अभूमि इअं मालविआए । किं तक्केसि ।

निपुणिका । [5]तक्केमि डोलापरिब्भट्टचलणाए देवीए असोअदोहलाहिआरे मालविआ णिउत्तेत्ति । अण्णहा कहं देवी सअं धारिदं एदं णेउरजुअलं परिअणस्स अब्भणुजाणिस्सदि ।

इरावती । [6]महदी क्खु से संभावणा ।

---

१. अवलोकयतु भट्टिनी । चूताङ्कुरं विचिन्वत्योरावयोः पिपीलिकादंशनम् । *a proverb "we are gathering mango-sprays & ants are bi[ting]" i.e. our pleasure is stopped by an unpleasant surpris[e]*

२. किमिवैतत् ।

३. एषाशोकपादपच्छायायां मालविकाया बकुलावलिका चरणालंकारं निर्वर्तयति ।

४. अभूमिरियं मालविकायाः । किं तर्कयसि ।

५ तर्कयामि दोलापरिभ्रष्टचरणया देव्याशोकदोहदाधिकारे मालविका नियुक्तेति । अन्यथा कथं देवी स्वयं धारितमेतन्नूपुरयुगुलं परिजनस्याभ्यनुज्ञास्यति ।

६. महती खल्वस्याः संभावना ।

---

2. B आलोअदु.
3. A C D विचिण्णन्दाणं ; B विचिणन्दोणं; F विउण्णन्तीणं.— A पिपीलाआ°; B पिप्पलिआ°; C पिपालआ° (पिपोलआ°?); F पिपोलीआ°.
6. A C णिवट्टइ; D णिवट्टेइ; E णिवट्टेइ.
8. C तक्कसि.
10. E णिउत्तेति.
11. B D E धारीदं.—A अरोअण्णस्स ; B अरीअणस्स.—B D अब्भणु°.
13. A C मे for "से."

निपुणिका । [1]किं ण अण्णेसीअदि भट्टा ।

इरावती । [2]हञ्जे मे चलणा अग्गदो ण पवट्टन्ति । मणो मह विआरेदि । आसङ्किदस्स दाव अन्तं गमिस्सं ।

मालविका निर्वर्ण्य । आत्मगतम् । ठाणे ख्खु कादरं मे हिअअं ।

बकुलावलिका । चरणं दर्शयन्ती । [3]अवि रोआदि दे अअं चलणराअरेहाविण्णासो ।

मालविका । [4]हला अत्तणो चलणंगदंति लज्जेमि पसंसिदुं । कहेहि केण सिप्पसाहणकलाअं अहिविणीदासि ।

बकुलावलिका । [5]एथ्थ ख्खु भट्टिणो सिस्सम्हि ।

विदूषकः । [6]तुवरेहि दाणिं गुरुदख्खिणाए ।

मालविका । [7]दिट्ठिआ ण गव्विदासि ।

---

१. किं नान्विष्यते भर्ता ।

२. हञ्जे मे चरणावग्रतो न प्रवर्तेते । मनो मम विक्रियते । आशङ्कितस्य तावदन्तं गमिष्यामि । स्थाने खलु कातरं मे हृदयम् ।

३. अपि रोचते तेयं चरणरागरेखाविन्यासः ।

४. हला आत्मनश्चरणगतमिति लज्जे प्रशंसितुम् । कथय केन शिल्पसाधनकलायामभिविनीतासि ।

५. अत्र खलु भर्तुः शिष्यास्मि ।

६. त्वरस्वेदानीं गुरुदक्षिणायै ।

७. दिष्ट्या न गर्वितासि ।

---

1. B अण्णेसिअदि.
3. A C D E F मम for "मह."
5. A अपि for "अवि."—C अअं दे instead of "दे अअं."—A adds another दे after "अअं."
6. A C °रेहविणासो.
7. A चलणगदं.
8. A B C D E °कलं.
9. B एथ्थं—A C om. "ख्खु."
10. F inserts दाव before "दाणिं."
11. A C D गव्विदासी ; B गव्विदासो.

बकुलावलिका । [1]उवदेसाणुरूवे चलणे लम्भिअ दाणिं गव्विदा भविस्सं । रागं विलोक्य । आत्मगतम् । सिध्धं मे दोच्चं । प्रकाशम् । सहि एकस्स दे चलणस्स अवसिदो राअणिक्खेवो । केवलं मुहमारुदो लम्भइदव्वो । अह वा पवादो एव्व अअं पएसो ।

राजा । सखे पश्य पश्य ।

आर्द्रालक्तकमस्याश्चरणं मुखमारुतेन वीजयितुम् ।
प्रतिपन्नः प्रथमतरः संप्रति सेवावकाशो मे ॥ १३ ॥

विदूषकः । [2]कुदो दे अणुसओ । चिरं भवदा एदं अणुहोदव्वं अचिरेण ।

बकुलावलिका । [3]अरुणसदपत्तं विअ सोहदि दे चलणो । सव्वहा भट्टिणो अङ्कपरिवट्टिणी होहि ।

इरावती । निपुणिकामुखमवेक्षते ।

राजा । ममेयमाशीः ।

मालविका । [4]हला अवचणीअं मन्तेसि ।

बकुलावलिका । [5]मन्तिदव्वं एव्व मए मन्तिदं ।

---

१. उपदेशानुरूपौ चरणौ लब्ध्वेदानीं गर्विता भविष्यामि । सिद्धं मे दौत्यम् । सखि एकस्य ते चरणस्यावसितो रागनिक्षेपः । केवलं मुखमारुतो लम्भयितव्यः । अथ वा प्रवात एवायं प्रदेशः ।

२. कुतस्तेऽनुशयः । चिरं भवतैतदनुभवितव्यमचिरेण ।

३. अरुणशतपत्त्रमिव शोभते ते चरणः । सर्वथा भर्तुरङ्कपरिवर्तिनी भव ।

४. हला अवचनीयं मन्त्रयसि ।

५. मन्त्रयितव्यमेव मया मन्त्रितम् ।

---

3. A B C एक्कस्स.
5. B पवेसो (पदेसो ?).
7. F वीजयतः.

10. Our MSS. कमेण (=क्रमेण) for "अचिरेण." We according to G.

मालविका । [1]पिआ क्खु अहं तुह ।

बकुलावलिका । [2]ण केवलं मह ।

मालविका । [3]कस्स वा अण्णस्स ।

बकुलावलिका । [4]गुणेसु अहिणिवेसिणो भट्टिणोवि ।

मालविका । [5]अलीअं मन्तेसि । एदं एव्व मइ णत्थि ।

बकुलावलिका । [6]सच्चं तुइ णत्थि । भट्टिणो किसेसु ईसिपरिपण्डरेसु अङ्गेसु दीसइ ।

निपुणिका । [7]पुढमं भणिदं विअ हदासाए उत्तरं ।

बकुलावलिका । [8]अणुराओ अणुराएण पडिक्खिदव्वोत्ति सुजणचरिदं पमाणीकरेहि ।

---

१. प्रिया खल्वहं तव ।
२. न केवलं मम ।
३. कस्य वान्यस्य ।
४. गुणेष्वभिनिवेशिनो भर्तुरपि ।
५. अलीकं मन्त्रयसि । एतदेव मयि नास्ति ।
६. सत्यं त्वयि नास्ति । भर्तुः कृशेष्वीषत्परिपाण्डुरेष्वङ्गेषु दृश्यते ।
७. प्रथमं भणितमिव हताशाया उत्तरम् ।
८. अनुरागोऽनुरागेण परीक्षितव्य इति सुजनचरितं प्रमाणीकुरु ।

---

1. A तुव for "तुह."
2. A C D E मम for "मह."
5. E has एदे एवं (एव्व ?) मइ ण होन्दि for "एदं &c.; A B C also एदे for "एदं."—A C मई.
6. E ण होन्दि for "णत्थि."—B इसि°.—E दीसन्दि.
8. B C D put the speech "पुढमं" &c. in the mouth of Nipuṇikâ; A and E also originally assigned it to the same character, but they afterwards correct themselves so as to give it to Mâlavikâ.— F पुडमभणिदं विअ.
9. F पडिच्छिदव्वो (= परिच्छेत्तव्यः)
10. A पमाणि°.

मालविका । [1]किं अप्पणो छन्देण मन्तेसि ।

बकुलावलिका । [2]णे हि । भट्टिणो एदाइं पणअमआइं अक्खराइं बिम्बन्तरिदाइं ।

मालविका । [3]हला देविं विचिन्तिअ ण मे हिअअस्स पहविस्सं ।

बकुलावलिका । [4]मुध्धे भमरसंबध्धोत्ति वसन्दावदारसव्वस्सो ण चूदपल्लवो किं ओदंसइदव्वो ।

मालविका । [5]तुमं दाव दुज्जादे मे अच्चन्तसाहाइणी होहि ।

बकुलावलिका । [6]विमद्दसुरही बउलावलिआ क्खु अहं ।

राजा । साधु बकुलावलिके साधु ।

भावज्ञानानन्तरं प्रस्तुतेन
प्रत्याख्याने दत्तयुक्तोत्तरेण ।
वाक्येनेयं स्थापिता स्वे निदेशे
स्थाने प्राणाः कामिनां दूत्यधीनाः ॥ १४ ॥

---

१. किमात्मनश्छन्देन मन्त्रयसि ।

२. न हि । भर्तुरेतानि प्रणयमयान्यक्षराणि बिम्बान्तरितानि ।

३. हला देवीं विचिन्त्य न मे हृदयस्य प्रभविष्यामि ।

४. मुग्धे भ्रमरसंबद्ध इति वसन्तावतारसर्वस्वो न चूतपल्लवः किमवतंसयितव्यः ।

५. त्वं तावद्दुर्जाते मेऽत्यन्तसाहाय्यकारिणी भव ।

६. विमर्दसुरभिर्बकुलावलिका खल्वहम् ।

---

1. D छन्देन.
2. A B C D एदाई.
4. B विचिन्तीअ; C विचिन्दिअ.
5. Our MSS. भमरसंपादोत्ति. We with G.—A C D E °सव्वस्सं.
7. A B C D °साहाहिणी.
8. A B C D E °सुरहि.

इरावती । [1]हञ्जे पेक्ख । कारिदं एव्व बउलावलिआए मालविआए पदं ।

निपुणिका । [2]भट्टिणी णिव्विआरस्सवि उस्सुअत्तणज्जणओ उवदेसो ।

इरावती । [3]ठाणे क्खु सङ्किदं मे हिअअं । गहीदत्था अणन्तरं चिन्तइस्सं ।

बकुलावलिका । [4]एसो दे दुदीओवि समत्तपडिकम्मो चलणो । जाव दुवेवि सणेउरा करेमि । नाट्येन नूपुरयुगलमामुच्य । हला उट्ठेहि । अणुचिट्ठ देवीए दाणिं असोअविआसइत्तअं णिओअं ।

। उभे उत्तिष्ठतः ।

इरावती । [5]सुदो देवीए णिओओत्ति । होदु दाणिं ।

बकुलावलिका । [6]एसो उवारूढराओ उवभोअक्खमो दे पुरदो वट्टइ ।

---

१. हञ्जे प्रेक्षस्व । कारितमेव बकुलावलिकया मालविकया पदम् ।

२. भट्टिनि निर्विकारस्याप्यौत्सुक्यजनक उपदेशः ।

३. स्थाने खलु शङ्कितं मे हृदयम् । गृहीतार्थानन्तरं चिन्तयिष्यामि ।

४. एष ते द्वितीयोपि समाप्तप्रतिकर्मा चरणः । तावद्द्वावपि सनूपुरौ करोमि । हला उत्तिष्ठ । अनुतिष्ठ देव्या इदानीमशोकविकाशयितृकं नियोगम् ।

५. श्रुतो देव्या नियोग इति । भवत्विदानीम् ।

६. एष उपारूढराग उपभोगक्षमस्ते पुरतो वर्तते ।

---

1. A B C D देक्ख for "पेक्ख."

3. F भट्टिणि.—A निव्वि°.—A B C D E omit °त्तण°.

5. B ट्ठाणे.—A C E गहिद°.

7. D E दुदीयो°.

8. E °युगल°.

9. A C दाणीं; F omits it altogether.

11. B तिष्ठतः.

मालविका । सहर्षम् । [1]किं भट्टा ।

बकुलावलिका । सस्मितम् । [2]ण दाव भट्टा । एसो असोअसाहावलम्बी पल्लवगुच्छो । ओदंसेहि णं ।

विदूषकः । [3]अवि सुदं भवदा ।

राजा । पर्याप्तमेतावता कामिनाम् ।

अनादरोत्कण्ठितयोः प्रसिध्यता
समागमेनापि रतिर्न मां प्रति ।
परस्परप्राप्तिनिराशयोर्वरं
शरीरनाशोऽपि समानुरागयोः ॥ १५ ॥

मालविका । रचितपल्लवावतंसा सलीलमशोकताडनाय पादं प्रहिणोति ।

राजा । वयस्य पश्य ।

आदाय कर्णकिसलयमस्मादियमत्र चरणमर्पयति ।
उभयोः सदृशविनिमयादात्मानं वञ्चितं मन्ये ॥ १६ ॥

बकुलावलिका । [4]हला णत्थि दे दोसो अगुणो अअं असोओ जइ कुसुमसमुब्भेदमन्थरो भवे । जो ईरिसं चलणसक्कारं लहेइ ।

---

१. किं भर्ता ।
२. न तावद्भर्ता । एषोऽशोकशाखावलम्बी पल्लवगुच्छः । अवतंसयैनम् ।
३. अपि श्रुतं भवता ।
४. हला नास्ति ते दोषः अगुणोऽयमशोको यदि कुसुमसमुद्भेदमन्थरो भवेत् । य ईदृशं चरणसत्कारं लभते ।

---

4. E omits "अवि."
9. A F समानरागयोः
10. Our MSS. अशोकाय. We according to G.
11. F omits पश्य.
15. A C जई.—F °मन्धरो.
16. A B C D E लहेयि.

राजा ।

अनेन तनुमध्यया मुखरनूपुराराविणा
नवाम्बुरुहकोमलेन चरणेन संभावितः ।
अशोक यदि सद्य एव कुसुमैर्न संपत्स्यसे
वृथा वहसि दोहलं ललितकामिसाधारणम् ॥ १६ ॥

सखे वचनावसरपूर्वकं प्रवेष्टुमिच्छामि ।

विदूषकः । [1]एहि णं परिहासइस्सं ।

। उभौ प्रवेशं कुरुतः ।

निपुणिका । [2]भट्टिणी भट्टा एत्थ पविस्सदि ।

इरावती । [3]एदं मम पुढमं चिन्तिदं हिअएण ।

विदूषकः । उपसृत्य । [4]होदि ण जुत्तं णाम अत्तहोदो पिअवअस्सो असोओ वामपादेण ताडेदुं ।

उभे ससंभ्रमम् । [5]अम्हो भट्टा ।

विदूषकः । [6]बउलावलिए तुए गहीदत्थाए अत्तहोदी ईरिसं अविणअं करन्ती किस ण वारिदा ।

मालविका । भयं निरूपयति ।

१. एह्येनां परिहासयिष्यामि ।
२. भट्टिनि भर्तात्र प्रविशति ।
३. इदं मम प्रथमं चिन्तितं हृदयेन ।
४. भवति न युक्तं नामात्रभवतः प्रियवयस्योऽशोको वामपादेन ताडयितुम् ।
५. अहो भर्ता ।
६. बकुलावलिके त्वया गृहीतार्थयात्रभवतीदृशमविनयं कुर्वन्ती कथं न वारिता ।

7. B परिहासईस्सं.
9. F भट्टिणि.—F अत्थ for "एत्थ."
10. Our MSS. इदं मालविआए for "एदं मम." We according to G.—F पुडमं.
11. A B C D E insert एदं before "ण जुत्तं."
14. A B C D E गहिद°.—A C इरिसं.
15. F किं सा for "किस."

निपुणिका । [1]भट्टिणी देक्ख किं पवुत्तं अज्जगोदमेण ।

इरावती । [2]कहं स बम्हबन्धू अण्णहा जीविस्सादि ।

बकुलावलिका । [3]अज्ज देवीए एसा णिओअं अणुचिट्ठइ । एदस्सिं अदिक्कमे परवदी इअं । पसीददु भट्टा । आत्मना सममेनां प्रणिपातयति ।

राजा । यद्येवमनपराधः । भद्रे उत्तिष्ठ । हस्तेन गृहीत्वोत्थापयति ।

विदूषकः । [4]जुज्जइ । देवी एत्थ माणइदव्वा ।

राजा ।

किसलयमृदोर्विलासिनि कठिने निहितस्य पादपस्कन्धे ।
चरणस्य न ते बाधा संप्रति वामस्य वामोरु ॥ १७ ॥

मालविका । लज्जते ।

इरावती । सासूयम् । [5]अम्हो णवणीदकप्पहिअओ अज्जउत्तो ।

---

१. भट्टिनि पश्य किं प्रवृत्तमार्यगौतमेन ।

२. कथं स ब्रह्मबन्धुरन्यथा जीविष्यति ।

३. आर्य देव्या एषा नियोगमनुतिष्ठति । एतस्मिन्नतिक्रमे परवतीयम् । प्रसीदतु भर्ता ।

४. युज्यते । देव्यत्र मानयितव्या ।

५. अहो नवनीतकल्पहृदय आर्यपुत्रः ।

---

1. E F भट्टिणि.—F दक्ख.—D E अ॰अ॰.—B पउत्तं.—F पजुत्तं, translated by प्रयुक्तम्.
2. B जीविसदि ; D E जविस्सिदि.
3. D E F अ॰अ॰.—B अणुचिट्ठई.
7. F अत्थ for "एत्थ."
10. F वामोरू वामस्य.
11. C लज्जति.
12. Our MSS. omit सासूयम्. We according to G. — F omits °कप्प°.

मालविका । [1]बउलावलिए एहि । अणुट्ठिदं अत्तणो णिओअं देवीए णिवेदेम्ह ।

बकुलावलिका । [2]तेण विण्णवेहि भट्टारं विसज्जेहिन्ति ।

राजा । भद्रे यास्यसि । मम तावदुत्पन्नावसरमर्थित्वं श्रूयताम् ।

बकुलावलिका । [3]अवहिदा सुणाहि । आणवेदु भट्टा ।

राजा ।

> धृतिपुष्पमयमपि जनो बध्नाति न तादृशं चिराप्रभृति ।
> स्पर्शामृतेन पूरय दोहलमस्याप्यनन्यरुचेः ॥ १८ ॥

इरावती । सहसोपसृत्य । [4]पुरेहि पुरेहि । णं असोओ कुसुमं दंसेदि । अअं उण ण केवलं पुप्फइ फलइ अ ।

। सर्वे इरावतीं दृष्ट्वा संभ्रान्ताः ।

राजा । जनान्तिकम् । वयस्य का प्रतिपत्तिरत्र ।

विदूषकः । [5]किं अण्णं । जङ्घाबलं एव्व ।

---

१. बकुलावलिके एहि । अनुष्ठितमात्मनो नियोगं देव्यै निवेदयावः ।
२. तेन विज्ञापय भर्तारं विसृजेति ।
३. अवहिता शृणु । आज्ञापयतु भर्ता ।
४. पूरय पूरय । नन्वशोकः कुसुमं दर्शयति । अयं पुनर्न केवलं पुष्प्यति फलति च ।
५. किमन्यत् । जङ्घाबलमेव ।

---

2. B C D णिवेदेम.
3. A विण्णवेहि.—E विसज्जहिन्ति.
4. B has 'भद्रे यास्यसि मा तावत्.'
9. B ण्णं for "णं."—A B C E do not repeat "पुरेहि;" F पूरेहि पूरेहि.—F translates णं by एनम् in its छाया.
10. F दंसेइ.
12. F omits अत्र.
13. A अणं.—Our MSS. जङ्घावलम्मणं. We according to G.

इरावती । [1]बउलावलिए साहु तुए उपक्कन्तं । मालविए तुमं दाव अज्जउत्तं सफलपत्थणं करेहि ।

उभे । [2]पसीददु भट्टिणी । का अम्हे भट्टिणो प्पणअप्पसङ्गस्स ।

[निष्क्रान्ते]

इरावती । [3]अहो अविस्ससणीआ पुरुसा । मए क्खु अत्तणो वञ्चणावअणं पमाणीकरिअ वाहजणगीदरत्ताए हरिणीए विअ असङ्किदाए एदं ण विण्णादं ।

विदूषकः । जनान्तिकम् [4]पडिओजेहि किंपि । कम्मगहीदेण कुम्भिलएण "संधिछेअसिक्खकोम्हि" त्ति एत्थ वत्तव्वं होदि ।

राजा । सुन्दरि मालविकायां न मे कश्चिदर्थः । मया त्वं चिरायसीति कथंचिदात्मा विनोदितः ।

---

१. वकुलावलिके साधु त्वयोपक्रान्तम् । मालविके त्वं तावदार्यपुत्रं सफलप्रार्थनं कुरु ।

२. प्रसीदतु भट्टिनी । के आवां भर्तुः प्रणयप्रसङ्गस्य ।

३. अहो अविश्वसनीयाः पुरुषाः । मया खल्वात्मनो वञ्चनावचनं प्रमाणीकृत्य व्याधजनगीतरक्तया हरिण्येवाशङ्कितयेदं न विज्ञातम् ।

४. प्रतियोजय किमपि । कर्मगृहीतेन कुम्भिलकेन "संधिच्छेदशिक्षकोस्मी"त्यत्र वक्तव्यं भवति ।

---

1. B तए for "तुए."
2. D E F अ-अ°.
3. A D E पणअ°.—F पणअपडिग्गहस्स.
5. E पुरिसा.
6. A E पमाणी°.—B °करीअ.
7. F omits "असङ्किताए."
8. F पडियोजेहि किंवि.—A B C D E °गहिदेण.—F takes कम्म with पडियोजेहि किंवि, and explains its translation कर्म by "मृषेत्यर्थः". But this is hardly possible. कम्मगहीदेण = by (a thief) caught in the act.
12. B कथं कथंचिन्.

इरावती । [1]विस्ससणीओसि । मए ण विण्णादं एतारिसं विणोदवथ्थु अज्जउत्तेण उवलध्धंति । अण्णहा दुक्खतरं एव्वं ण करेमि ।

विदूषकः । [2]मा दाव अत्तहोदी अत्तहोदो दक्खिण्णस्स उवरोहं भणादु । समापत्तिदिट्ठेण देवीए परिजणेण संकहावि जइ अवराही ठावीअदि एथ्थ तुमं एव्व प्पमाणं ।

इरावती । [3]णं संकहा णाम होदु । केत्तिअं कालं अत्ताणं आआसइस्सं । रुष्टा प्रस्थिता ।

राजा । अनुसरन् । प्रसीदतु भवती ।

इरावती । रशनासंदितचरणा व्रजत्येव ।

राजा । सुन्दरि न शोभते प्रणयिजननिरपेक्षता ।

इरावती । [4]सठ अविस्ससणीअहिअओसि ।

---

१. विश्वसनीयोसि । मया न विज्ञातमेतादृशं विनोदवस्त्वार्यपुत्रेणोपलब्धमिति । अन्यथा दुःखतरमेवं न करोमि ।

२. मा तावदत्रभवत्यत्रभवतो दाक्षिण्यस्योपरोधं भणतु । समापत्तिदृष्टेन देव्याः परिजनेन संकथापि यद्यपराधी स्थाप्यतेत्र त्वमेव प्रमाणम् ।

३. ननु संकथा नाम भवतु । कियन्तं कालमात्मानमायासयिष्यामि ।

४. शठ अविश्वसनीयहृदयोसि ।

---

1. A विणादं.
2. D E F अ॰-अ॰.
3. A B C D E एव्व for "एव्वं".
4. F अवराहं (= अपराधं) for "उवरोहं."
5. A B C जई.
6. F अवराहे.—D E पमाणं.
7. A संकह णाम.
10. F ॰संदानितचरणा.
12. A सट.—A C अविस्ससणीडज॰; B has विस्ससणीडज॰ corrected from अविस्ससणीडज॰.

राजा ।

शठ इति मयि तावदस्तु ते
परिचयवत्यवधीरणा प्रिये ।
चरणपतितया न चण्डतां
विसृजसि मेखलयापि याचिता ॥ १९ ॥

इरावती । [1]इअंपि हदासा तुमं एव्व अणुसरदि । रशनामादाय राजानं ताडयितुमिच्छति ।

राजा । एषा

बाष्पासारा हेमकाञ्चीगुणेन
श्रोणीबिम्बादव्यपेक्षाच्युतेन ।
चण्डी चण्डं हन्तुमभ्युद्यता मां
विद्युद्दाम्ना मेघराजीव विन्ध्यम् ॥ २० ॥

इरावती । [2]किं मं भूओवि अवरध्धं करेसि । इति सरशनहस्तमालम्बते ।

राजा ।

अपराधिनि मयि दण्डं संहरसि किमुद्यतं कुटिलकेशि ।
वर्धयसि विलसितं त्वं दासजनायात्र कुप्यसि च ॥२१॥

आत्मगतम् । नूनमिदानीमनुज्ञातम् । पादयोः पतति ।

---

१. इयमपि हताशा त्वामेवानुसरति ।
२. किं मां भूयोऽप्यपराद्धां करोषि ।

---

6. F इअवि.
10. A B C D E अभ्युपेक्षा°.
11. E अभ्युद्गता.
13. A मां for "मं."— A B C D E भूगोवि.—F अवरुध्धं, translated in its छाया by अवरोधं.

इरावती । [१]ण हु इमे मालविआए चलणा जे दे परिसदोहलं पूरइस्सन्दि ।

[ससखी निष्क्रान्ता ।

विदूषकः । [२]भो उट्ठेहि उट्ठेहि । किदप्पसादोसि ।

राजा । उत्थायेरावतीमपश्यन् । कथं गतैव प्रिया ।

विदूषकः । [३]दिट्ठिआ इमस्स अविणअस्स अप्पसादिदा गदा । ता वअं सिग्घं अवक्कमाम जाव अङ्गारओ रासिं विअ सा अणुवक्कं ण करेइ ।

राजा । अहो मनसिजवैषम्यम् ।

मन्ये प्रियाहृतमनास्तस्याः प्रणिपातलङ्घनं सेवाम् ।
एवं हि प्रणयवती सा शक्यमुपेक्षितुं कुपिता ॥२२॥

॥ इति परिक्रम्य निष्क्रान्ताः सर्वे ॥

॥ इति तृतीयोऽङ्कः ॥

---

१. न खल्विमौ मालविकायाश्चरणौ यौ ते स्पर्शदोहदं पूरयिष्यतः ।

२. भो उत्तिष्ठोत्तिष्ठ । कृतप्रसादोसि ।

३. दिष्ट्यैतस्याविनयस्याप्रसादिता गता । तदावां शीघ्रमपक्रमावो यावदङ्गारको राशिमिव सानुवक्रं न करोति ।

---

1. F हरिसदोहलं.
2. A C E पुरइस्सदि.
4. F omits "भो."
6. D E अविणयस्स.—A B C D अप्पसादिदा.
7. F दाव सिग्घं for "ता वअं सिग्घं."

। ततः प्रविशति पर्युत्सुको राजा प्रतीहारी च ।

राजा । आत्मगतम् ।

तामाश्रित्य श्रुतिपथगतामास्थया लब्धमूलः
संप्राप्तायां नयनविषयं रूढरागप्रवालः ।
हस्तस्पर्शैर्मुकुलित इव व्यक्तरोमोद्गतत्वात्
कुर्यात्क्लान्तं मनसिजतरुर्मां रसज्ञं फलस्य ॥१॥

प्रकाशम् । सखे गौतम ।

प्रतीहारी । [1]जेदु भट्टा । असंणिहिदो गोदमो ।

राजा । आत्मगतम् । अये मालविकावृत्तान्तज्ञानाय प्रेषितः ।

विदूषकः । प्रविश्य । [2]जेदु भवं ।

राजा । जयसेने जानीहि क्व देवी धारिणी कथं वा सरुजचरणत्वाद्विनोद्यत इति ।

प्रतीहारी । [3]जं देवो आणवेदि ।

[इति निष्क्रान्ता ।

राजा । सखे को वृत्तान्तस्ते सख्यास्तत्रभवत्याः ।

विदूषकः । [4]जो बिडालगहीदाए परहुदिआए ।

राजा । सविषादम् । कथमिव ।

---

१. जयतु भर्ता । असंनिहितो गौतमः ।
२. जयतु भवान् ।
३. यद्देव आज्ञापयति ।
४. यो बिडालगृहीतायाः परभृतिकायाः ।

---

5. B D F °रोमोद्गमत्वात्.
8. B भट्टो.
16. A B C D E °गहिदाए.

विदूषकः । [1]सा क्खु तवस्सिणी ताए पिङ्गलच्छीए सारभण्डभूमिघरए मिच्चुमुहे व्विअ णिक्खित्ता ।

राजा । ननु मत्संपर्कमुपलभ्य ।

विदूषकः । [2]अह इं ।

राजा । गौतम क एवं विमुखोऽस्माकं येन चण्डी कृता देवी ।

विदूषकः । [3]सुणादु भवं । परिव्वाजिआ मे कहेइ । हिओ किल तत्तहोदी इरावदी रुजाविहत्थचलणं देविं सुहं पुच्छिदुं आअदा । तदो सा देवीए पुच्छिदा । किं ण लक्खिदो जणो वल्लहोत्ति । ताए उत्तं । मन्दो वो उवआरो । जं दे परिअणस्स वल्लहत्तणं तं ण जाणासित्ति ।

राजा । भो निर्भेदादृतेऽपि मालविकायामयमुपन्यासः शङ्कयति ।

विदूषकः । [4]तदो ताए अणुणिब्बन्धिज्जमाणाए भवदो अविणअं अन्तरेण परिगहीदत्था किदा देवी ।

---

१. सा खलु तपस्विनी तया पिङ्गलक्ष्म्या सारभाण्डभूमिगृहे मृत्युमुख इव निक्षिप्ता ।

२. अथ किम् ।

३. शृणोतु भवान् । परिव्राजिका मे कथयति । ह्यः किल तत्रभवतीरावती रुजाविहस्तचरणां देवीं सुखं प्रष्टुमागता । ततः सा देव्या पृष्टा । किं न लक्षितो जनो वल्लभ इति । तयोक्तम् । मन्दो व उपचारः । यत्ते परिजनस्य वल्लभत्वं तन्न जानासीति ।

४. ततस्तयानुनिर्बध्यमानया भवतोऽविनयमन्तरेण परिगृहीतार्था कृता देवी ।

---

3. F उपलभ्यते.
4. A C ईं for "इं."
6. F पडिव्वाजिआ.
7. A तत्तहोदो—A देवीसुहं; C देविं- [सुहं.
9. F omits "वो."
10. A णं for "ण."
13. A B C D E अणुबन्धिज्ज°.
14. A B C D E परिगहिद°.

राजा । अहो दीर्घरोषता तत्रभवत्याः । अतः परं कथय ।

विदूषकः । [१]अदो वरं किं । मालविआ बउलावलिआ अ णिअलवदीओ अदिट्ठसुज्जपादं पादालवासं णाअकण्णआ विअ अणुहोन्ति ।

राजा । कष्टम् ।

मधुररवा परभृतिका भ्रमरी च विबुद्धचूतसङ्गिन्यौ ।
कोटरमकालवृष्ट्या प्रबलपुरोवातया गमिते ॥ २ ॥

वयस्य अप्यत्रोपक्रमस्य कस्यचिद्गतिः स्यात् ।

विदूषकः । [२]कहं भविस्सदि । जं सारभण्डवाउदा माहविआ देवीए संदिट्ठा मह अङ्गुलीअमुद्दं अदेक्खिअ ण मोत्तव्वा तुए हदासा मालविएत्ति ।

राजा । निःश्वस्य । सखे किमत्र प्रतिकर्तव्यम् ।

विदूषकः । विचिन्त्य । [३]अत्थि अत्थ उवाओ ।

राजा । क इव ।

---

१. अतः परं किम् । मालविका वकुलावलिका च निगडवत्यावदृष्टसूर्यपादं पातालवासं नागकन्यके इवानुभवतः ।

२. कथं भविष्यति । यत्सारभाण्डव्यापृता माधविका देव्या संदिष्टा ममाङ्गुलीयमुद्रामदृष्ट्वा न मोक्तव्या त्वया हताशा मालविकेति ।

३. अस्त्यत्रोपायः ।

---

1. B अत्रभवत्यां for "तत्रभवत्याः."
3. A B C D E °सुड्ज.°
6. F मधुरस्वरापरभृति: as the first pâda.
8. F वयस्य अप्यस्य कस्यचिदुपक्रमस्य &c.
10. A C D E F मम for "मह."—F अदक्खिअ.
13. E एत्थ. But it seems to have originally read अत्थ.—F अत्थि एव उवाओ (= अस्त्येवोपायः).

विदूषकः । सदृष्टिक्षेपम् । [1]कोवि अदिट्ठो सुणादि । ता कण्णे दे कहेमि । उपश्लिष्य कर्णे । एव्वं विअ ।

राजा । सष्ठु चिन्तितं प्रयुज्यतां सिद्धये ।

प्रतीहारी । प्रविश्य । [2]देव पवादसअणे देवी णिसण्णा रत्त-चन्दणधारिणा परिअणहत्थगहीदेण चलणेण भअवदीए परिव्वाजिआए कहाहिं विणोदिअमाणा चिट्ठइ ।

राजा । अस्मत्प्रवेशयोग्योयमवसरः ।

विदूषकः । [3]ता गच्छदु भवं । अहंवि देविं देक्खिदुं अरित्तपाणि भविस्सं ।

राजा । जयसेनायास्तावत्संवेद्य गच्छ ।

विदूषकः । कर्णे । [4]होदि एव्वं विअ ।

[इति निष्क्रान्तः ।

राजा । जयसेने प्रवातशयनमार्गमादेशय ।

प्रतीहारी । [5]इदो इदो ।

। ततः प्रविष्टा शयनस्था देवी परिव्राजिका विभवतश्च परिवारः ।

---

१. कोप्यदृष्टः शृणोति । तत्कर्णे ते कथयामि । एवमिव ।

२. देव प्रवातशयने देवी निषण्णा रक्तचन्दनधारिणा परिजनहस्तगृहीतेन चरणेन भगवत्या परिव्राजिकया कथाभिर्विनोद्यमाना तिष्ठति ।

३. तद्गच्छतु भवान् । अहमपि देवीं प्रेक्षितुमरिक्तपाणिर्भवामि ।

४. भवति एवमिव ।

५. इत इतः ।

---

4. B पादसअणे.—A C णिस्सण्णा.
5. A B C D E °गहिदेण.
8. B गच्छद्.—F देवीं दक्खिदुं.—D F ण्पाणो.
10. F संपाद्य for "संवेद्य."
11. B omits "होदि".—A C E F एवं.
14. D does not repeat "इदो."
15. B परीवारः.

देवी । [1]भअवदि अदिरमणिज्जं कहावत्थु । तदो तदो ।

परिव्राजिका । सदृष्टिक्षेपम् । अतःपरं पुनः कथयिष्यामि । अत्रभवानीश्वरः संप्राप्तः ।

देवी । [2]अम्हो अज्जउत्तो । इत्युत्थातुमिच्छति ।

राजा । अलमलमुपचारयन्त्रणया ।

अनुचितनूपुरविरहं नार्हसि तपनीयपीठकालम्बि ।
चरणं रुजापरीतं कलभाषिणि मां च पीडयितुम् ॥३॥

परिव्राजिका । विजयतां देवः ।

देवी । [3]जेदु अज्जउत्तो ।

राजा । परिव्राजिकां प्रणम्योपविश्य । देवि अपि सह्या वेदना ।

देवी । [4]अत्थि मे दाणिं विसेसो ।

। ततः प्रविशति यज्ञोपवीतबद्धाङ्गुष्ठः संभ्रान्तो विदूषकः ।

विदूषकः । [5]अवि हा अवि हा । सप्पेण संदट्ठोम्हि ।

। सर्वे विषण्णाः ।

राजा । कष्टम् । क्व भवान्परिभ्रान्तः ।

---

१. भगवति अतिरमणीयं कथावस्तु । ततस्ततः ।
२. अहो आर्यपुत्रः ।
३. जयत्वार्यपुत्रः ।
४. अस्ति म इदानीं विशेषः ।
५. अपि हा अपि हा । सर्पेण संदष्टोस्मि ।

---

1. C रमणिज्जं; F रमणीज्जं.
4. D E F अ-अ°.
6. A B C E नार्हति.
9. E अ-अ°.
11. F omits "दाणिं" altogether.
14. E omits the repeated "अवि हा."

विदूषकः । [1]देविं देक्खिस्संति आआरपुप्फग्गहणकालणादो प्पमदवणं गदोम्हि । परित्ताअदु परित्ताअदु ।

देवी । [2]हद्धि हद्धि । अहं एव्व बम्हणस्स जीविदसंसए णिमित्तं जादा ।

विदूषकः । [3]तहिं असोअत्थवअस्स कालणादो मए प्पसारिदे अग्गहत्थे कोडरणिग्गदेण कालेण सप्परूविणा दट्ठो । णं एदाइं दुव्वे दन्तपदाइं । इति दंशं दर्शयति ।

परिव्राजिका । तेन हि दंशच्छेदः पूर्वकर्मेति श्रूयते । स तावदस्य क्रियताम् ।

छेदो दंशस्य दाहो वा क्षतेर्वा रक्तमोक्षणम् ।
एतानि दष्टमात्राणामायुषः प्रतिपत्तयः ॥ ४ ॥

राजा । संप्रति विषवैद्यानां कर्म । जयसेने क्षिप्रमानीयतां ध्रुवसिद्धिः ।

प्रतीहारी । [4]जं देवो आणवेदि ।

[इति निष्क्रान्ता ।

विदूषकः । [5]अहो पावेण मिच्चुणा गहीदोम्हि ।

---

१. देवीं द्रक्ष्यामीत्याचारपुष्पग्रहणकारणात् [i. e. °ग्रहणाय]प्रमदवनं गतोऽस्मि । परित्रायतां परित्रायताम् ।

२. हा धिक् हा धिक् । अहमेव ब्राह्मणस्य जीवितसंशये निमित्तं जाता ।

३. तत्राशोकस्तवकस्य कारणात् [i.e. अशोकस्तबकाय] मया प्रसारितेऽग्रहस्ते कोटरनिर्गतेन कालेन सर्परूपिणा दष्टः । नन्वेते द्वे दन्तपदे ।

४. यद्देव आज्ञापयति ।

५. अहो पापेन मृत्युना गृहीतोऽस्मि ।

---

1. F देवीं दक्खिदुं।त.
2. A C D E पमद°.
3. F जीविदसंसअणिमित्तं.
5. B आसोअथ्थवयस्स; D असोअ°.
6. F हथ्थे for "अग्गहथ्थे".—F सव्वरूविणा.
10. Our MSS., and even G, make the couplet "छेदो" &c. a part of the following speech of the king. We with Tullberg.
14. A C अण्णवेदि.
16. A C मिमच्चुणा; F मिश्चुणा.—A B C D E गहिदो.

राजा। मा कातरो भूः। अविषः कदाचिद्दंशो भवेत्।

विदूषकः। [1]कहं ण भाइस्सं। सिमिसिमाअन्ति मे अङ्गाइं।

विषवेगं निरूपयति।

देवी। उपसृत्य। [2]ही ही असुहं दंसिदं विआरेण। हला अवलम्बह णं।

परिजनः। ससंभ्रममवलम्बते।

विदूषकः। राजानमवलोक्य। [3]भो भवदो बालत्तणादोवि पिअवअस्सोम्हि। तं विआरिअ मुध्धाए मे जणणीए ओअक्खेमं वहेहि।

राजा। मा भैषीः। अचिरात्त्वां वैद्यश्चिकित्सते। स्थिरो भव।

प्रविश्य प्रतीहारी।

प्रतीहारी। [4]देव ध्रुवसिध्धी विण्णवेदि। इह ज्जेव आणीअदु गोदमोत्ति।

राजा। तेन हि वर्षवरपरिगृहीतमेनं तत्रभवतः सकाशं प्रापय।

प्रतीहारी। [5]तह।

---

१. कथं न भेष्यामि। सिमिसिमायन्ति मेऽङ्गानि।

२. हा हा। असुखं दष्टं विपारेण। हला अवलम्बध्वमेनम्।

३. भो भवतो बाल्यादपि प्रियवयस्योऽस्मि। तद्विचार्य मुग्धाया मे जनन्या योगक्षेमं वहस्व।

४. देव ध्रुवसिद्धिर्विज्ञापयति। इहैवानीयतां गौतम इति।

५. तथा।

---

1. F अविषोपि.
2. AC भाईस्सं.
3. D रूपयति.
4. Our MSS. अहिअं दंसिदं विअ विआरेण for "असुहं" &c. We according to G.
8. E बुध्धाए.
12. A विणवेदि.—F इह एव्व.—A B C आणीयदु.
14. E वर्षधर°.

विदूषकः । देवीं विलोक्य । [१]भोदी जीविअं वा ण वा जं मए अत्तभवन्तं सेवमाणेण दे अवरध्धं तं सव्वं अवराहं मरिसेहि ।

देवी । [२]दीहाऊ होहि ।

[निष्क्रान्तो विदूषकः प्रतीहारी च ।

राजा । प्रकृतिभीरुस्तपस्वी । ध्रुवसिद्धेरपि यथार्थनाम्नः सिद्धिं न मन्यते ।

प्रतीहारी । प्रविश्य । [३]जेदु भट्टा । धुवसिध्धी विण्णवेदि उदकुम्भविहाणे सप्पमुद्दिअं कंपि अण्णेसीअदु त्ति ।

देवी । [४]इदं सप्पमुद्दिअं अङ्गुलीअअं । पच्छा मह हथ्थे देहि णं । इति प्रयच्छति ।

राजा । जयसेने कर्मसिद्धावाशु प्रतिपत्तिमानय ।

प्रतीहारी । [५]जं देवो आणवेदि ।

[इति निष्क्रान्ता ।

परिव्राजिका । यथा मे हृदयमाचष्टे तथा निर्विषो गौतमः ।

राजा । भूयादेवम् ।

---

१. भवति जीवेयं वा न वा यन्मयात्रभवन्तं सेवमानेन तेपराद्धं तं सर्वमपराधं मर्षय ।

२, दीर्घायुर्भव ।

३. जयतु भर्ता । ध्रुवसिद्धिर्विज्ञापयति । उदकुम्भपिधाने सर्पमुद्रिका कामप्यन्विष्यतामिति ।

४. इदं सर्पमुद्रीयमङ्गुलीयकम् । पश्चान्मम हस्ते देह्येतत् ।

५. यद्देव आज्ञापयति ।

---

1. A C भोदि.—F reads thus: जं मए अत्तभवन्तं सेवमाणेण दे अवरध्धं तं सव्वं अवराहं मरिसेहि । होदि जीविअं वा ण वा.

2. A तस्सव्वं ; B त्तं सव्वं.—B मरिस्सेहि.

7. Our MSS. सिद्धिं मन्ये. We with Tullberg.

8. A C ध्रुवसिध्धि ; B ध्धुवसिध्धी ; D ध्रुवसिद्धी.—A विणवेदि.

10. B सप्पमुद्दीअं ; C °मुद्दीअं.—E F मम for "मह."

11. B D E omit "इति."

प्रतीहारी । प्रविश्य । [1]जेदु भट्टा । णिवुत्तविसवेओ गोदमो पकिदित्थो एव्व संवुत्तो ।

देवी । [2]दिट्ठिआ वअणीआदो मुत्तम्हि ।

प्रतीहारी । [3]एसो अमच्चो वाहदवो विण्णवेदि । राअकज्जं बहु मन्तिदव्वं । ता दंसणेण अणुग्गहीदुं इच्छामित्ति ।

देवी । [4]गच्छदु अज्जउत्तो कज्जसिध्धीए ।

राजा । देवि आतपाक्रान्तोयमुद्देशः । शीतक्रिया चास्य प्रशस्ता । तदन्यत्र नीयतां शयनीयम् ।

देवी । [5]बालिआ अज्जउत्तवअणं अणुचिट्ठह ।

परिजनः । [6]तह ।

[इति निष्क्रान्ता देवी परिव्राजिका परिजनश्च ।

राजा । जयसेने गूढपथेन प्रमदवनं प्रापय ।

प्रतीहारी । [7]इदो इदो देवो ।

राजा । जयसेने ननु समाप्तकृत्यो गौतमः ।

---

१. जयतु भर्ता । निवृत्तविषवेगो गौतमः प्रकृतिस्थ एव संवृत्तः ।

२ दिष्ट्या वचनीयान्मुक्तास्मि ।

३. एषोमात्यो वाहतवो विज्ञापयति । राजकार्यं बहु मन्त्रितव्यम् । तद्दर्शनेनानुग्रहीतुम् [i. e. दर्शनानुग्रहम्] इच्छामीति ।

४. गच्छत्वार्यपुत्रः कार्यसिद्ध्यै ।

५. बालिका आर्यपुत्रवचनमनुतिष्ठत ।

६. तथा ।

७. इत इतो देवः ।

---

1. F निलुत्तविस°.
4. B C D वाहदव्वो.—B राजकज्जं.
5. A C अणुगहिदुं.
6. D E F अ-अ.°
9. B बालिभ; F बालिसा (= बालिशाः).—D E F अ-अ°.

प्रतीहारी । [1]अह इं ।

राजा ।

इष्टाधिगमनिमित्तं प्रयोगमेकान्तसाधुमपि मत्वा ।
संदिग्धमेव सिद्धौ कातरमाशङ्कते चेतः ॥ ९ ॥

। प्रविश्य विदूषकः ।

विदूषकः । [2]जेदु जेदु भवं । सिध्धाइं मे मङ्गलकज्जाइं ।

राजा । जयसेने त्वमपि नियोगमशून्यं कुरु ।

प्रतीहारी । [3]जं देवो आणवेदि ।

[इति निष्क्रान्ता ।

राजा । वयस्य क्षुद्रा माधविका । न किंचिद्विचारितमनया ।

विदूषकः । [4]देवीए अङ्गुलीअमुद्दं देक्खिअ कहं विआरीअदि ।

राजा । न खलु मुद्रामधिकृत्य ब्रवीमि । तयोर्बद्धयोः किंनिमित्तोयं मोक्षः । "किं देव्याः परिजनमतिक्रम्य भवान्संदिष्ट" इत्येवमनया प्रष्टव्यम् ।

---

१. अथ किम् ।

२. जयतु जयतु भवान् । सिद्धानि मे मङ्गलकार्याणि ।

३. यद्देव आज्ञापयति ।

४. देव्या अङ्गुलीयमुद्रां दृष्ट्वा कथं विचार्यते ।

---

6. A D E F do not repeat "जेदु."—A C D E °कम्माइ.

10. F reads thus : वयस्य क्षुद्रमाधविकया न किंचिद्विचारितमनया ।

11. B अङ्गुलि°.—B देक्खीअ ; F दक्खिअ.

विदूषकः । [1]णं पुच्छिदोम्हि । पच्चुप्पण्णबुध्धिणा मए कहिदं । देव्वचिन्तएहिं राआ भणिओ । सोवसग्गं वो णक्खत्तं । ता सव्वबन्धणमोक्खो करिअदुत्ति । तं सुणिअ देवीए धारिणीए इरावदीचित्तं रक्खन्तीए राआ किल मोएदित्ति तुमं एव्व मोएहित्ति अहं संदिट्ठोम्हि । तदो जुज्जइत्ति ताए संपादिओ अत्थो ।

राजा । विदूषकं परिष्वज्य । सखे प्रियोहं तव ।

न हि बुद्धिगुणेनैव सुहृदामर्थदर्शनम् ।
कार्यसिद्धिपथः सूक्ष्मः स्नेहेनाप्युपलभ्यते ॥ ६ ॥

विदूषकः । [2]तुवरदु भवं । समुद्दघरए ससहिं मालविअं ठाविअ भवन्तं पच्चुग्गदोम्हि ।

राजा । अहमेनां संभावयामि । गच्छाग्रतः ।

विदूषकः । [3]एदु भवं । एदं समुद्दघरअं ।

---

१. ननु पृष्टोस्मि । प्रत्युत्पन्नबुद्धिना मया कथितम् । दैवचिन्तकै राजा भणितः । सोपसर्गं वो नक्षत्रम् । तत्सर्वबन्धनमोक्षः क्रियतामिति । तच्छ्रुत्वा देव्या धारिण्येरावतीचित्तं रक्षन्त्या राजा किल मोचयतीति त्वमेव मोचयेत्यहं संदिष्टोस्मि । ततो युज्यत इति तया संपादितोर्थः ।

२. त्वरतां भवान् । समुद्रगृहे ससखीं मालविकां स्थापयित्वा भवन्तं प्रत्युद्गतोस्मि ।

३. एतु भवान् । एतत्समुद्रगृहम् ।

---

1. B °पच्चुपण्ण°; F पच्चुत्तरपच्चुप्पण्णबुध्धिणा (= प्रत्युत्तरप्रत्युत्पन्नबुद्धिना.)
3. A B C सुणीअ.
4. A राओ.
5. A B C D E omit "एव्व" after "तुमं."
9. B F उपलक्ष्यते.
10. E तुवरेदु.

राजा । साशङ्कम् । एषा कुसुमावचयव्यग्रहस्ता सख्यास्त इरावत्याः परिचारिका चन्द्रिका समागच्छति । इतस्तावदावां भित्तिगूढौ भवावः ।

विदूषकः । [1]कुम्भिलएहिं कामुएहिं अ पलिहलणीआ चन्दिआ ।

। उभौ यथोक्तं कुरुतः ।

राजा । गौतम कथं नु ते सखी मां प्रतिपालयति । एह्येनां गवाक्षमाश्रित्य विलोकयावः ।

। इति विलोकयन्तौ स्थितौ ।

। ततः प्रविशति मालविका बकुलावलिका च ।

बकुलावलिका । [2]हला पणम भट्टारं जो पस्सदो पिट्ठदो देक्खीअदि ।

राजा । मन्ये प्रतिकृतिं मे दर्शयति ।

मालविका । सहर्षम् । [3]णमो दे । द्वारमवलोक्य सविषादम् । कहिं भट्टा । हला विप्पलम्भेसि मं ।

---

१. कुम्भीलकैः कामुकैश्च परिहरणीया चान्द्रका ।

२. हला प्रणम भर्तारं यः पार्श्वतः पृष्ठतो दृश्यते ।

३. नमस्ते । क्व भर्ता । हला विप्रलभसे माम् ।

---

1. Our MSS., and even G, कुसुमापचय.° We with Tullberg.

3. B °गूढं.

4. F पडिहलणीआ.

7. F omits "नु."

8. F reads प्रतिपालयावः अवलोकयावः (the latter most likely intended to be an explanation of the former) in place of our "विलोकयावः"

9. B D E omit "इति."

11. A C D E पणम.—A C देखी°; F दक्खिअदि.

14. B आलोक्य.

राजा । सखे हर्षविषादाभ्यामत्रभवत्याः प्रीतोस्मि ।

सूर्योदये भवति या सूर्यास्तमये च पुण्डरीकस्य ।
वदनेन सुवदनायास्ते समवस्थे क्षणादूढे ॥ ७ ॥

बकुलावलिका । [1]णं एसो चित्तगओ भट्टा ।

उभे । प्रणिपत्य । [2]जेदु भट्टा ।

मालविका । [3]हला तदा संमुहट्टिदा अहं भट्टिणो रूवदंसणेण तह ण वितिण्हम्हि जह अज्ज । विभाविदो चित्तगददंसणो एव्व भट्टा ।

विदूषकः । [4]सुदं भवदा । अत्तहोदीए दिट्ठो जह चित्ते ण तह दिट्ठो भवंति मन्तिदं । मुधा दाणिं मञ्जूसा विअ रअणभण्डं जोव्वणगव्वं वहेसि ।

---

१. नन्वेष चित्रगतो भर्ता ।

२. जयतु भर्ता ।

३. हला तदा संमुखस्थिताहं भर्तू रूपदर्शनेन तथा न वितृष्णास्मि यथाद्य । विभावितश्चित्रगतदर्शन एव भर्ता ।

४. श्रुतं भवता । अत्रभवत्या दृष्टो यथा चित्रे न तथा दृष्टो भवानिति मन्त्रितम् । मुधेदानीं मञ्जूषेव रत्नभाण्डं यौवनगर्वं वहसि ।

---

3. F reads the fourth pâda thus: ते समवस्थे क्षणादुपारूढे, thus turning the ârya into a gîti.

6. Our MSS. ससंभमं उक्कण्ठिआ for "संमुहट्टिदा." We with G. — A B C D E omit "तदा."

7. A B C D E omit "ण."—B C संभाविदो.

8. F omits "एव्व."

9. Our MSS. अत्तहोदीए [F अत्तहोदी] चित्ते जह दिट्ठो भवं तह अदिट्ठोत्ति मन्तेदि. We according to G.

11. E जोब्वण°.

राजा । सखे कुतूहलवानपि निसर्गशालीनः स्त्रीजनः । पश्य ।

कार्त्स्न्येन निर्वर्णयितुं च रूपम्
इच्छन्ति तत्पूर्वसमागतानाम् ।
न च प्रियेष्वायतलोचनानां
समग्रपातीनि विलोचनानि ॥ ८ ॥

मालविका । [1]का एसा ईसिपरिउत्तवअणा भट्टिणा सिणिध्धाए दिट्ठीए णिज्झाइअदि ।

बकुलावलिका । [2]णं इअं पस्सगदा इरावदी ।

मालविका । [3]सहि अदक्खिणो विअ मे पडिभाइ । जो सव्वं देवीजणं उज्झिअ एदाए मुहे बध्धलक्खो ।

बकुलावलिका । आत्मगतम् । [4]चित्तगदं भट्टारं परमथ्थं गेण्हिअ असूएदि । होदु । कीलिस्सं दाव एदाए । प्रकाशम् । भट्टिणो वल्लहा एसा ।

मालविका । [5]तदो किं दाणिं अत्ताणं आआसेमि । सासूयं परावर्तते ।

---

१. कैषेषत्परिवृत्तवदना भर्त्रा स्निग्धया दृष्ट्या निध्यायते ।
२. नन्वियं पार्श्वगतेरावती ।
३. सखि अदक्षिण इव मे प्रतिभाति । यः सर्वं देवीजनमुज्झित्वैतस्या मुखे बद्धलक्षः ।
४. चित्रगतं भर्तारं परमार्थं गृहीत्वासूयति । भवतु । क्रीडिष्यामि तावदेतया । भर्तुर्वल्लभैषा ।
५. ततः किमिदानीमात्मानमायासयामि ।

---

2. A B C D E हि for "च."
4. A B C D E प्रियेष्या°.
6. D ईसीपरि°.—B D दिट्ठीए.
8. A C पस्संगदा.—D E इरावई.
9. A B C अदक्खिणो.—E पडभाइ.
10. B उइझीअ.
11. F परमथ्थदो.—A C गिण्हिअ.
12. A C असूआदि.—B C कीलिसं.
14. B दाणीं.

राजा । पश्य सखे ते सख्या मुखम् ।

भ्रूभङ्गभिन्नतिलकं स्फुरिताधरोष्ठं
सासूयमाननमितः परिवर्तयन्त्या ।
कान्तापराधकुपितेष्वनया विनेतुः
संदर्शितेव ललिताभिनयस्य शिक्षा ॥ ९ ॥

विदूषकः । [1]अणुणअसज्जो दाणिं होहि ।

मालविका । [2]अज्जगोदमोवि एत्थ एव्व सेवेदि णं । पुनः स्थानान्तराभिमुखी भवितुमिच्छति ।

बकुलावलिका । मालविकां रुद्ध्वा । [3]ण हु कुविदा दाणिं तुमं ।

मालविका । [4]जइ चिरं कुविदं मण्णेसि एसो पच्चाणीअदि कोवो ।

राजा । उपेत्य ।

कुप्यसि कुवलयनयने चित्रार्पितचेष्टया किमेवमयि ।
ननु तव साक्षादयमहमनन्यसाधारणो दासः ॥ १० ॥

बकुलावलिका । [5]जेदु भट्टा ।

मालविका । आत्मगतम् । [6]कहं चित्तगदो भट्टा मए असूइदो । सव्रीडवदनाञ्जलिं करोति ।

---

१. अनुनयसज्ज इदानीं भव ।
२. आर्यगौतमोऽप्यत्रैव सेवत एनम् ।
३. न खलु कुपितेदानीं त्वम् ।
४. यदि चिरं कुपितां मन्यसे एष प्रत्यानीयते कोपः ।
५. जयतु भर्ता ।
६. कथं चित्रगतो भर्ता मयासूयितः ।

---

3. B C °वर्तयन्त्याः.
7. D E अ-अ°.—Our MSS. अज्जगोदमो एत्थ ण सेवेदि. We with G.
9. E णं हि; A B C D हि for "हु."
10. A F कुविदां.
12. A omits "उपेत्य."

राजा । मदनकातर्यं निरूपयति ।

विदूषकः । [1]किं भवं उदासीणो विअ ।

राजा । अविश्वसनीयत्वात्सख्यास्ते ।

विदूषकः । [2]मा दाव अत्तहोदीअं तुह अविस्सासो ।

राजा । श्रूयताम् ।

पथि नयनयोः स्थित्वा स्वप्ने तिरोभवति क्षणात्
सरति सहसा बाह्वोर्मध्यं गताप्यबला सती ।
मनसिजरुजा क्लिष्टस्यैवं समागममायया
कथमिव सखे विश्रब्धं स्यादिमां प्रति मे मनः ॥ ११॥

बकुलावलिका । [3]सहि बहुसो किल भट्टा विप्पलद्धो । दाव एत्थ विस्ससणिज्जो अप्पा करीअदु ।

मालविका । [4]सहि मम उण मन्दभाआए सिविणअसमाअमो-वि भट्टिणो दुल्लहो आसी ।

बकुलावलिका । [5]भट्टा देहि से उत्तरं ।

---

१. किं भवानुदासीन इव ।
२. मा तावदत्रभवत्यां तवाविश्वासः ।
३. सखि बहुशः किल भर्ता विप्रलब्धः । तावदत्र विश्वसनीय आत्मा क्रियताम् ।
४. सखि मम पुनर्मन्दभाग्यायाः स्वप्नसमागमोपि भर्तुर्दुर्लभ आसीत् ।
५. भर्तर्देह्यस्या उत्तरम् ।

---

2. A उदासिणो.
4. F अत्तहोदिअं.
6. G स्थित्वा स्थित्वा for "स्थित्वा स्वप्ने."
9. E F विस्रब्धं.
11. F अत्थ.—D E आप्पा ; F अत्ता.
12. B मन्दहाआए.— F सिविणसमागमो.
13. A C D E F आसि.
14. B C D भट्टा अ देहि &c.

राजा ।

उत्तरेण किमात्मैव पञ्चबाणाग्निसाक्षिकम् ।
तव सख्यै मया दत्तो न सेव्यः सेविता रहः ॥ १२॥

बकुलावलिका । [१]अणुग्गहीदम्हि ।

विदूषकः । परिक्रम्य ससंभ्रमम् । [२]बउलावलिए एसो बालासोअरुक्खस्स पल्लवाणि हरिणो लङ्घिदुं आअच्छइ । ता एहि णिवारेम णं ।

बकुलावलिका । [३]तह । प्रस्थिता ।

राजा । एवमस्मद्रक्षणेवहितेन भवितव्यम् ।

विदूषकः । [४]एदंवि गोदमो णं संदिस्सीअदि ।

बकुलावलिका । [५]अज्जगोदम अहं अप्पआसे चिट्ठामि । तुमं दुवाररक्खओ होहि ।

विदूषकः । [६]जुज्जइ ।

---

१. अनुगृहीतास्मि ।

२. बकुलावलिके एष बालाशोकवृक्षस्य पल्लवान्हरिणो लङ्घितुमागच्छति । तदेहि निवारयाव एनम् ।

३. तथा ।

४. एतदपि गौतमो ननु संदिश्यते ।

५. आर्यगौतम अहमप्रकाशे तिष्ठामि । त्वं द्वाररक्षको भव ।

६. युज्यते ।

---

4. A C D E अणुग्गहि°; B अणुग्गहि°.
5. A B C D E एस for "एसो."
6. Our MSS. पल्लवा. We with G.
10. F एवंवि.—A B C D E omit "णं"
11. E F अ—अ°.
13. D जूज्जइ; E जुज्जई.

[निष्क्रान्ता बकुलावलिका ।

विदूषकः । [1]इमं दाव फलिअथ्थलं आस्सिदो होमि । तथा कृत्वा । अहो सुहप्परिसदा सिलाविसेसस्स । निद्रायते ।

मालविका । ससाध्वसं तिष्ठति ।

राजा ।

विसृज सुन्दरि संगमसाध्वसं
ननु चिरात्प्रभृति प्रणयोन्मुखे ।
परिगृहाण गते सहकारतां
त्वमतिमुक्तलताचरितं मयि ॥ १३ ॥

मालविका । [2]देवीए भएण अत्तणोवि प्पिअं कादुं ण पारेमि ।

राजा । अयि न भेतव्यं न भेतव्यम् ।

मालविका । [3]जो ण भाएदि सो मए भट्टिणीदंसणे दिट्ठसमवथ्थो भट्टा ।

राजा ।

दाक्षिण्यं नाम बिम्बोष्ठि बैम्बिकानां कुलव्रतम् ।
तन्मे दीर्घाक्षि ये प्राणास्ते त्वदाशानिबन्धनाः ॥ १४ ॥

---

१. इदं तावत्स्फटिकस्थलमाश्रितो भवामि । अहो सुखस्पर्शता शिलाविशेषस्य ।
२. देव्या भयेनात्मनोपि प्रियं कर्तुं न पारयामि ।
३. यो न बिभेति स मया भट्टिनीदर्शने दृष्टसमवस्थो भर्ता ।

---

1. E inserts इति before "निष्क्रान्ता" &c.
3. A C सुहेपरिस°; E has °स्फंसदा as a marginal gloss on °परिसदा.
10. A D E पिअं
11. A B C D अपि for "अयि."
12. B °दंसणो; F °दस्सणे.—F दिठ्ठो समवथ्थो भट्टा.

तदयमनुगृह्यतां चिरानुरक्तो जनः । इति संश्लेषमभिनयति ।

मालविका । नाट्येन परिहरति ।

राजा । आत्मगतम् । रमणीयः खलु नवाङ्गनानां मदनविषयव्यापारः । एषा हि

हस्तं कम्पवती रुणद्धि रशनाव्यापारलोलाङ्गुलिं
हस्तौ स्वौ नयति स्तनावरणतामालिङ्ग्यमाना बलात् ।
पातुं पक्ष्मलचक्षुरुन्नमयतः साचीकरोत्याननं
व्याजेनाप्यभिलाषपूरणसुखं निर्वर्तयत्येव मे ॥ १४ ॥

। ततः प्रविशतीरावती
निपुणिका च ।

इरावती । [1]हञ्जे णिउणिए सच्चं तुह चन्दिआए संदिट्ठं समुद्दघरालिन्दए अज्जगोदमो एआई दिट्ठोत्ति ।

निपुणिका । [2]किं अण्णहा भट्टिणीए विण्णविदं ।

इरावती । [3]तेण हि तहिं एव्व गच्छामो संसआदो णिम्मुत्तं अज्जउत्तस्स पिअवअस्सं पिअं पुच्छिदुं । च —

---

१. हञ्जे निपुणिके सत्यं तव चन्द्रिकया संदिष्टं समुद्रगृहालिन्द आर्यगौतम एकाकी दृष्ट इति ।

२. किमन्यथा भट्टिन्यै विज्ञापितम् ।

३. तेन हि तत्रैव गच्छावः संशयान्निर्मुक्तमार्यपुत्रस्य प्रियवयस्यं प्रियं प्रष्टुम् । च—

---

1. A B C D E omit "अयम्."
3. F मदनविषयावतारः.
5. A B C D E कम्पयती (कम्पयेन?) —A B C D E ॰लोलांशुकम्.
7. F ॰नेत्रमुन्नमयतः.
12. Our MSS. ॰घरए. We with G. D E F अ-अ॰.
13. F अलीअं for "अण्णहा."
15. A B C D E अ for "च."— None of our MSS. read

निपुणिका । [1]सावसेसं विअ भट्टिणीए वअणं ।
इरावती । [2]अण्णं च चित्तगदं अज्जउत्तं पसादेदुं ।
निपुणिका । [3]अह दाणिं भट्टा एव्व किं ण पच्चणुणीअदि ।
इरावती । [4]मुध्धे जारिसो चित्तगदो तारिसो एव्व अण्णसंकन्तहिअओ अज्जउत्तो । केवलं उवआरादिक्कमं पमज्जिदुं अम्हाणं आरम्भो ।
निपुणिका । [5]इदो भट्टिणी । इति परिक्रामतः ।

। प्रविश्य चेटी ।

चेटी । [6]जेदु भट्टिणी । देवी भणादि । एसो ण मे मच्छरस्स कालो ।

---

१. सावशेषमिव भट्टिन्या वचनम् ।
२. अन्यच्च चित्रगतमार्यपुत्रं प्रसादयितुम् ।
३. अथेदानीं भर्तैव किं न प्रत्यननीयते ।
४. मुग्धे यादृशश्चित्रगतस्तादृश एवान्यसंक्रान्तहृदय आर्यपुत्रः । केवलमुपचारातिक्रमं प्रमार्ष्टुमस्माकमारम्भः ।
५. इतो भट्टिनी ।
६. जयतु भट्टिनी । देवी भणति । एष न मे मत्सरस्य कालः ।

---

in this passage णिम्मुत्तुं or मुत्तुं, the latter of which is read by Dr. Tullberg. Supposing it were possible for मुत्तुं to be the Prâkṛit form of the infinitive, the omission of a word like अत्ताणं as its object would speak much against that reading. G has altogether a different version. It reads "संसआदो मुत्तंसं । दंसवुत्तन्तं अ-अउत्तस्स पिअवअस्सं पुच्छिस्सं अ ।" But मुत्तंसं for मोक्ष्ये or मुक्ता भविष्यामि is at least very suspicious. See our Notes.

2. D E F अ-अ°.—G reads चित्तगदं भट्टारं पसादेदुं अ for "अण्णं च" &c.

3. G reads कहं for "किं" and puts it before "भट्टा."

4 F जादिसो for "जारिसो."

5. D E F अ-अ°.—A B C पमज्जिदुं; F पमज्जिअदुं.

7. B D E omit "इति."

तुह बहुमाणं वढ्ढिदुं वअस्सिआए सह णिअलबन्धणे किदा मालविआ । जइ अणुमण्णेसि अज्जउत्तस्स पिअं कादुं तह करेमि । जं तुह इच्छिदं तं भणाहित्ति ।

इरावती । [1]णाअरिए विण्णवेहि भट्टिणीं । का वअं भट्टिणीं णिओजेदुं । परिअणणिग्गहेण मइ दंसिदो अणुग्गहो । कस्स वा अण्णस्स प्पसादेण अअं जणो वढ्ढदित्ति भणाहि ।

चेटी । [2]तह ।

[इति निष्क्रान्ता ।

निपुणिका । परिक्रम्यावलोक्य च । [3]भट्टिणी एस दुवारुच्छङ्गे समुद्द-

---

तव बहुमानं वर्धयितुं वयस्यया सह निगडबन्धने कृता मालविका । यद्यनुमन्यसे, आर्यपुत्रस्य प्रियं कर्तुं, तथा करोमि । यत्तवेष्टं तद्भणेति ।

१. नागरिके विज्ञापय भट्टिनीम् । का वयं भट्टिनीं नियोजयितुम् । परिजननिग्रहेण मयि दर्शितोनुग्रहः । कस्य वान्यस्य प्रसादेनायं जनो वर्धत इति भण ।

२. तथा ।

३. भट्टिनि एष द्वारोत्सङ्गे समुद्रगृहस्य विपणिगतो वृषभ इव विश्रब्ध आर्यगौतम आसीन एव निद्रायते ।

---

1. A B C वट्टिदुं; E वट्टिदुं.
2. A B C D E मण्णेमि for "अणुमण्णेसि."—D E अ–अ°.—F reads as follows, after "मालविआ" । जइ अणुमण्णसि अ–अउत्तंवि तुह किदे विण्णाबइस्सं ॥ एदं कज्जं । तह करेमि ॥ जं तुह इच्छिदं तं मे भणाहित्ति ॥
6. F णिओएदुं.—Our MSS. insert वि (= अपि) after °ग्गहेण. We with G.—F दस्सिदो.
7. A B C पसादेण.—B C वट्टदित्ति; D वट्टदित्ति.

घरस्स विपणिगओ वुसहो विअ विस्सध्धो अज्जगोदमो आसीणो एव्व णिद्दाअदि ।

इरावती । [1]अच्चाहिदं । ण क्खु सावसेसो विसवेओ भवे ।

निपुणिका । [2]पसण्णमुहो दीसइ । अवि अ धुवसिध्धिणा चिइस्सिदो । ता से असङ्कणीअं पावं ।

विदूषकः । उत्स्वप्नायते । [3]होदि मालविए– ।

निपुणिका । [4]सुदं भट्टिणीए । कस्स एसो अत्तणीणो । अब्भवहारसंवादापेक्खी हदासो ओदरिओ इदो ससक्कारं सोत्थिवाअणमोदएहिं कुक्खिं भरिअ संपदं मालविअं उस्सिविणावेदि ।

---

१. अत्याहितम् । न खलु सावशेषो विषवेगो भवेत् ।

२. प्रसन्नमुखो दृश्यते । अपि च ध्रुवसिद्धिना चिकित्सितः । तदस्याशङ्कनीयं पापम् ।

३. भवति मालविके— ।

४. श्रुतं भट्टिन्या । कस्यैष आत्मनीनः । अभ्यवहारसंवादापेक्षी हताश औदरिक इतः ससत्कारं स्वस्तिवायनमोदकैः कुक्षिं पूरयित्वा सांप्रतं मालविकामुत्स्वप्नायते ।

---

1. E विपणिठाओ, F विपणिणिलयो, for "विपणिगओ."—A B C D E om. "वुसहो" after "विपणिगओ." — F omits "विस्सध्धो."—D E F अ॰अ°.
2. B D णिद्दायदि ; E णिदायदि.
3. F सावसेसविसो भवे.—B D णं खु.—F अच्चहिदं.
5. A B C D असक्कणीअं ; E असंक्कणीअं.
6. A C D E होदी.
7. A C अभवहार°
8. B ओदरीओ.—A B C D ससकारं; F सव्वकालं for "ससक्कारं."
10. A B C उस्सिविणं आइवेदि ; E उस्सिविणआइवेदि.

विदूषकः । [१]इरावदिं अदिक्कमन्दी होहि ।

निपुणिका । [२]सुदं अच्चाहिदं । भुअंगभीरुअं बम्हबन्धुं इमिणा भुअंगमकुडिलेण अत्तणो दण्डकट्ठेण तम्भन्तरिदा भाअआमि ।

इरावती । [३]अरुहदि किल किदवो उवद्दवस्स ।

निपुणिका । विदूषकस्योपरि दण्डकाष्ठं पातयति ।

विदूषकः । सहसा प्रतिबुध्य । [४]अवि हा अवि हा । णं दव्वीकरो मे उवरि पडिदो ।

राजा । सहसोपसृत्य । सखे न भेतव्यं न भेतव्यम् ।

मालविका । अनुसृत्य । [५]भट्टा मा दाव सहसा णिक्कम । सप्पोत्ति भणादि ।

इरावती । [६]हद्धि हद्धि । भट्टा इदो एव्व धावइ ।

---

१. इरावतीमतिक्रामन्ती भव ।
२. श्रुतमत्याहितम् । भुजंगभीरुकं ब्रह्मबन्धुमनेन भुजंगकुटिलेनात्मनो दण्डकाष्ठेन स्तम्भान्तरिता भीषयामि ।
३. अर्हति किल कितव उपद्रवम् ।
४. अपि हा अपि हा । ननु दर्वीकरो ममोपरि पतितः ।
५. भर्तर्मा तावत्सहसा निष्क्रम । सर्प इति भणति ।
६. हा धिक् हा धिक् । भर्तैव धावति ।

---

1. A C D E इरावदीं.
3. E °कुडिलेण.—F om. "अत्तणो."—A °काट्ठेण.—E तम्भन्तरिअ; F थ्थम्भन्तरिआ.—A C भआआमि.
5. A उवद्दव्वस्स.
7. A B C D E omit "णं."
8. A C वडिदो.
10. E निक्कम.
12. A C धावई.

विदूषकः । सप्रहासम् । [1]कहं दण्डकट्ठं इदं । अहं उण जाणे जं मए केअइकण्डएहिं सप्पस्स विअ दंसो किदो तं फलिदंति ।

। प्रविश्य पटाक्षेपेण बकुलावलिका ।

बकुलावलिका । ससंभ्रमम् । [2]कहिं सप्पो । मा क्खु भट्टा पविस । इह कुडिलगइ सप्पो विअ दीसइ ।

इरावती । राजानमुपसृत्य । [3]अवि सिध्धा मणोरहा दिवासंकेदमिहुणस्स ।

सर्वे । इरावतीं दृष्ट्वा संभ्रान्ताः ।

राजा । अपूर्वोयमुपचारः ।

इरावती । [4]बउलावलिए दिट्ठिआ दोच्चाहिआरविसआ संपुण्णा दे पडिण्णा ।

बकुलावलिका । [5]पसीददु भट्टिणी । किं दद्दुरा वाहरन्तित्ति देव्वो पुडविं विसुमरदि ।

---

१. कथं दण्डकाष्ठमिदम् । अहं पुनर्जाने यन्मया केतकीकण्टकैः सर्पस्येव दंशः कृतस्तत्फलितमिति ।
२. क्व सर्पः । मा खलु भर्तः प्रविश । इह कुटिलगतिः सर्प इव दृश्यते ।
३. अपि सिद्धा मनोरथा दिवासंकेतमिथुनस्य ।
४. बकुलावलिके दिष्ट्या दौत्याधिकारविषया संपूर्णा ते प्रतिज्ञा ।
५. प्रसीदतु भट्टिनी । किं दर्दुरा व्याहरन्तीति देवः पृथिवीं विस्मरति ।

---

1. A C D कधं.
2. A B C D वि for "विअ."—F तं एदं मे फलिदंति.
5. F सवो for "सप्पो."
6. D कुटिलगई.—D E दीसई.
11. A C D E दिठ्ठिया.
12. A C पडिणा.
13. A B C D E पसीद.—Our MSS. किं मए किदं । देवो पुछ्छिदव्वो for "किं दद्दुरा" &c. We with G.

विदूषकः । [1]मा दाव । अत्तहोदीए दंसणमेत्तएण अत्तभवं पणिपादलङ्घणं विसुमरिदो । तुमं उण अज्जवि पसादं ण गेण्हेसि ।

इरावती । [2]कुविदावि दाणिं अहं किं करिस्सं ।

राजा । अस्थाने कोप इत्यनुपपन्नं त्वयि । तथा हि ।

कदा मुखं वरतनु कारणादृते
तवागतं क्षणमपि कोपपात्रताम् ।
अपर्वणि ग्रहकलुषेन्दुमण्डला
विभावरी कथय कथं भविष्यति ॥ १८ ॥

इरावती । [3]अट्ठाणेत्ति सुट्ठु भणिदं अज्जउत्तेण । अण्णसंक्कन्तेसु अम्हाणं भाअहेएसु जइ उण कुप्पिस्सं तदो हस्सा भविस्सं ।

राजा । त्वमन्यथा कल्पयसि । अहं पुनः सत्यमेव कोपस्थानं न पश्यामि । कुतः ।

नार्हति कृतापराधोऽप्युत्सवदिवसेषु परिजनो बन्धम् ।
इति मोचिते मयैते प्रणिपतितुं मामुपगते च ॥१६॥

१. मा तावत् । अत्रभवत्या दर्शनमात्रेणात्रभवान्प्रणिपातलङ्घनं विस्मृतः । त्वं पुनरद्यापि प्रसादं न गृह्णासि ।

२. कुपितापीदानीमहं किं करिष्ये ।

३. अस्थान इति सुष्ठु भणितमार्यपुत्रेण । अन्यसंक्रान्तेष्वस्माकं भागधेयेषु यदि पुनः कुप्ये ततो हास्या भविष्यामि ।

2. A B C D E omit "अज्जवि."
3. A गण्हसि; C गेण्हसि.
4. A B C D E omit "°वि दाणिं."
10. D E F अ-अ°.
11. A B C F भाअहेयसु.—C जई.
13. B कलयसि for "कल्पयसि."
14. E omits "न" altogether.—Our MSS. गृह्णामि for "पश्यामि." We with G.
15. Our MSS. दण्डम्. We with G.

इरावती । [1]णिउणिए देवीं विण्णवेहि । दिट्ठं भवदीए पक्खवादित्तणंति ।

निपुणिका । [2]तह ।

[इति निष्क्रान्ता ।

विदूषकः । आत्मगतम् । [3]अहो अणत्थो संपडिदो । बन्धणब्भट्ठो गिहकपोदो चिल्लाए मुहे पडिदो ।

। प्रविश्य निपुणिका ।

निपुणिका । [4]भट्टिणी जदिच्छादिट्ठाए माहविआए आचक्खिदं । एव्वं खु एदं णिव्वुत्तं । इति कर्णे कथयति ।

इरावती । आत्मगतम् । [5]उववण्णं । सअं एव्व बम्हबन्धुणा उब्भिण्णो दुग्गप्पओओ । विदूषकं विलोक्य । प्रकाशम् । इअं इमस्स कामतन्तसइवस्स णीई ।

विदूषकः । [6]होदी जदि णीइए एक्कंपि अक्खरं पढेअं तदो गाअत्तिंपि विसुमरेइं ।

---

१. निपुणिके देवीं विज्ञापय । दृष्टं भवत्याः पक्षपातित्वमिति ।

२. तथा ।

३. अहो अनर्थः संपतितः । बन्धनभ्रष्टो गृहकपोतश्चिल्लाया मुखे पतितः ।

४. भट्टिनि यदृच्छादृष्टया माधविकयाख्यातम् । एवं खल्वेतन्निर्वृत्तमिति ।

५. उपपन्नम् । स्वयमेव ब्रह्मबन्धुनोद्भिन्नो दुर्गप्रयोगः । इयमेतस्य कामतन्त्रसचिवस्य नीतिः ।

६. भवति यदि नीत्या एकमप्यक्षरं पठेयं ततो गायत्रीमपि विस्मरेयम् ।

---

1. A देवीए. — F विणवेहि. — F पक्खवादित्तणं अड्जेत्ति.

5. Our MSS. गन्दारल्दालग्गो विअ for "बन्धणब्भट्ठो," which we read with Tullberg.

11. B C D दुग्गपआओ (= दुर्गप्रकाशः).

12. E णिइ ; A B C D णिई.

13. D E होदि.—A C D पढअं; E पठअं.

राजा । आत्मगतम् । कथं नु संकटादस्मादात्मानं मोक्ष्यामि ।

। प्रविश्य सावेगं जयसेना ।

जयसेना । [१]देव्व कुमारी वसुलच्छी कन्दुअं अणुधावन्ती पिङ्गलवाणरेण बलिअं उत्तासिदा अङ्कणिसण्णा देवीए पवादे किसलअं विअ वेवमाणा दाणिंपि पकिदिं ण पडिवज्जइ ।

राजा । कथं कातरो बालभावः ।

इरावती । सावेगम् । [२]तुवरेदु अज्जउत्तो णं समस्सासइदुं । मा से संदावजणिओ विआरो वड्ढदु ।

राजा । अहमेनां संज्ञापयामि । सत्वरं परिक्रामति ।

विदूषकः । आत्मगतम् । [३]साहु रे पिङ्गलवाणर साहु । परित्तादो तुए सपक्खो ।

[निष्क्रान्तो वयस्येन राजा इरावती प्रतीहारी च ।

---

१. देव कुमारी वसुलक्ष्मीः कन्दुकमनुधावन्ती पिङ्गलवानरेण बलवदुत्त्रासिताङ्कनिषण्णा देव्याः प्रवाते किसलय इव वेपमानेदानीमपि प्रकृतिं न प्रतिपद्यते ।

२. त्वरतामार्यपुत्र एनां समाश्वासयितुम् । मास्याः संतापजनितो विकारो वर्धताम् ।

३. साधु रे पिङ्गलवानर साधु । परित्रातस्त्वया सपक्षः ।

---

2. E सवेगं.

3. B °धावदी ; C D E °धावती; F धावन्दी.

4. A C °णिस्सण्णा ; F अङ्के णिसण्णा.

5. A C दाणीं°.—A पडिवज्जई.

7. F कट्टं for "कथं."

8. B D E तुवरदु.—D E अ-अ.°

9. A वट्टदु ; E वड्डदु.

10. C D E एतां.

11. We read "आत्मगतम्" with G.

मालविका । [1]हला देविं चिन्तअन्तीए वेवइ मे हिअअं । ण जाणे अदोवरं किं अणुहोदव्वंति ।

। नेपथ्ये ।

[2]अच्चरिअं अच्चरिअं । अपुण्णे एव्व पञ्चरत्ते दोहलस्स मुउलेहिं संणध्धो तवणीआसोओ । जाव देवीए णिवेदेमि ।

उभे । श्रुत्वा प्रहृष्टे ।

बकुलावलिका । [3]अस्ससदु पिअसही । सच्चप्पडिण्णा देवी ।

मालविका । [4]तेण हि पमदवणपालिआए पिट्ठदो होम्म ।

बकुलावलिका । [5]तह । [इति निष्क्रान्ताः सर्वे ।

॥ इति चतुर्थोऽङ्कः ॥

---

१. हला देवीं चिन्तयन्त्या वेपते मे हृदयम् । न जानेऽतः परं किमनुभवितव्यमिति ।

२. आश्चर्यमाश्चर्यम् । अपूर्ण एव पञ्चरात्रे दोहदस्य मुकुलैः संनद्धस्तपनीयाशोकः । यावद्देव्यै निवेदयामि ।

३. आश्वसितु प्रियसखी । सत्यप्रतिज्ञा देवी ।

४. तेन हि प्रमदवनपालिकायाः पृष्ठतो भवावः ।

५. तथा ।

---

1. F देवीं चिन्दयन्दीए.

2. F inserts सत्वरं परिक्रामति after "अणुहोदव्वंति."

9. C पिट्ठदो.

। ततः प्रविशत्युद्यानपालिका ।

उद्यानपालिका । [1]उवक्खित्तो मए किदसक्कारविहिणो तवणीआसोअस्स भित्तिबन्धो । जाव अणुट्ठिअणिओअं अप्पाणं देवीए णिवेदेमि । परिक्रम्य । अहो देव्वस्स अणुकम्पणिज्जा मालविआ । तस्सिं तह चण्डिआ देवी इमिणा असोअकुसुमउत्तन्तेण पसादाहिमुही भविस्सदि । कहिं णु खु भवे देवी । विलोक्य । एसो देवीपरिअणब्भन्तरो किंवि जदुमुद्दालञ्छिअं चीरमञ्जूसं करे गेण्हिअ कुज्जो सारसओ चउस्सालादो णिक्कमेदि । पुच्छिस्सं दाव णं ।

। ततः प्रविशति यथानिर्दिष्टः कुब्जः ।

उद्यान० । उपसृत्य । [2]सारसअ कहिं पत्थिदोसि ।

---

१. उपक्षिप्तो मया कृतसंस्कारविधेस्तपनीयाशोकस्य भित्तिबन्धः । यावदनुष्ठितनियोगमात्मानं देव्यै निवेदयामि । अहो दैवस्यानुकम्पनीया मालविका । तस्यां तथा चण्डिका देव्यनेनाशोककुसुमवृत्तान्तेन प्रसादाभिमुखी भविष्यति । क नु खलु भवेद्देवी । एष देवीपरिजनाभ्यन्तरः कामपि जतुमुद्रालाञ्छितां चीरमञ्जूषां करे गृहीत्वा कुब्जः सारसकश्चतुःशालाया निष्क्रमति । प्रक्ष्यामि तावदेनम् ।

२. सारसक कुत्र प्रस्थितोसि ।

---

2. B D E तवणीया°.

6. F omits "इमिणा."—F °कुसुमश्श्रवएण.

7. F देवीए परि°. [बन्धनं.

8. A B C जदु°; F जउ°.—F चीर-

9. F सारओ (= सारकः), and retains the same form of the proper name in the succeeding speeches.—A B C पुछिसं.

सारसकः । [1]मधुअरिए विज्जापारआणं अणुचिट्ठन्ताणं बम्हणाणं इमा णिच्चदक्खिणा मासिआ दादव्वा । तं अज्जपुरोहिदस्स हत्थं पाविदुं ।

मधुकरिका । [2]किंणिमित्तं ।

सारसकः । [3]जदप्पहुदि सुदं सेणावइणा जण्णतुरअरक्खणे णिउत्तो भट्टिदारओ वसुमित्तओत्ति तदप्पहुदि तस्स आउसो णिमित्तं अट्ठादससुवण्णपरिमाणं दक्खिणं देवी दक्खिण्णेहिं पडिग्गाहेइ ।

मधुकरिका । [4]जुज्जइ । अह कहिं देवी ।

सारसकः । [5]मङ्गलघरए आसणत्था विदब्भविसआदो भादुणा वीरसेणेण पेसिदं लिविकरेहिं वाचिअमाणं लेहपत्तं सुणादि ।

---

१. मधुकरिके विद्यापारगाणामनुतिष्ठतां ब्राह्मणानामियं नित्यदक्षिणा मासिका दातव्या । तामार्यपुरोहितस्य हस्तं प्रापयितुम् ।

२. किंनिमित्तम् ।

३. यतःप्रभृति श्रुतं सेनापतिना यज्ञतुरगरक्षणे नियुक्तो भर्तृदारको वसुमित्र इति ततःप्रभृति तस्यायुषो निमित्तमष्टादशसुवर्णपरिमाणां दक्षिणां देवी दक्षिण्यैः परिग्राहयति ।

४. युज्यते । अथ क्व देवी ।

५. मङ्गलगृह आसनस्था विदर्भविषयाद्भ्रात्रा वीरसेनेन प्रेषितं लिपिकारैर्वाच्यमानं लेखपत्त्रं शृणोति ।

---

1. F महुअरिए.—A °पारअणां, C °पारआणां ; F विज्जापारअणं.
2. F इअं for "इमा."—D E F अ-अ°.
6. A C णिवुत्तो.
8. B D E दाक्खिणेहिं ; C दक्खिणेहिं.—F पडिग्गाहीअइ.
11. A E लिविकेरेहिं.

मधुकरिका । [१]को उण विदब्भराअवुत्तन्तो ।

सारसकः । [२]वसीकिदो किल वीरसेणप्पमुहेहिं भट्टिणो विअअदण्डेहिं विदब्भणाहो । मोइदो से दाआदो माहवसेणो । तेण हि महासाराणि रअणवाहणाणि सिप्पिदारिआभूइट्ठं परिअणं अ उवाअणीकरिअ दूदो भट्टिणो सआसं पेसिदो । सुवो किल भट्टारं देक्खिस्सदित्ति ।

मधुकरिका । [३]गच्छ अणुचिट्ठ अत्तणो णिओअं । अहंवि देवीं पेक्खिस्सं ।

[निष्क्रान्तौ ।

॥ प्रवेशकः ॥

। ततः प्रविशति प्रतीहारी ।

प्रतीहारी । [४]आणत्तम्हि देवीए । विण्णवेहि अज्जउत्तं । इच्छामि अज्जउत्तेण सह असोअरुक्खपसूणलच्छीं पच्चक्खीकरेदुंति । जाव धम्मासणगदं देवं पडिवालेमि ।

।इति परिक्रामति ।

---

१. कः पुनर्विदर्भराजवृत्तान्तः ।

२. वशीकृतः किल वीरसेनप्रमुखैर्भर्तुर्विजयदण्डैर्विदर्भनाथः । मोचितोस्य दायादो माधवसेनः । तेन हि महासाराणि रत्नवाहनानि शिल्पिदारिकाभूयिष्ठं परिजनं चोपायनीकृत्य दूतो भर्तुः सकाशं प्रेषितः । श्वः किल भर्तारं द्रक्ष्यतीति ।

३. गच्छानुतिष्ठात्मनो नियोगम् । अहमपि देवीं प्रेक्षिष्ये ।

४. आज्ञप्तास्मि देव्या । विज्ञापयार्यपुत्रम् । इच्छाम्यार्यपुत्रेण सहाशोकवृक्षप्रसूनलक्ष्मीं प्रत्यक्षीकर्तुमिति । यावद्धर्मासनगतं देवं प्रतिपालयामि ।

---

2. A C D E °पमुहेहिं.

5. Our MSS. परिअणं उवाअणीकरिअ दूदो अ. We with G.—B E °करीअ.

6. B सुव्वो.—F दक्खि°.

8. B पेक्खीस्सं; F पक्खिस्सं.

12. E F अ-अ°.

13. D E F अ-अ°.—F °लछिं पच्चक्खीकरिदुंत्ति.

। नेपथ्ये वैतालिकौ ।

दिष्ट्या दण्डेनैवारिशिरःसु वर्तते देवः ।

प्रथमः ।

परभृतकलव्याहारेषु त्वमात्तरतिर्मधुं
नयसि विदिशातीरोद्यानेष्वनङ्ग इवाङ्गवान् ।
विजयकरिणामालानाङ्कैरुपोढबलस्य ते
वरद वरदारोधोवृक्षैः सहावनतो रिपुः ॥ १ ॥

द्वितीयः ।

विरचितपदं वीरप्रीत्या सुरोपमसूरिभिश्
चरितमुभयोर्मध्येकृत्य स्थितं क्रथकैशिकान् ।
तव हृतवतो दण्डानीकैर्विदर्भपतेः श्रियं
परिघगुरुभिर्दोर्भिः शौरेः प्रसह्य च रुक्मिणीम् ॥ २ ॥

प्रती॰ । [1]एसो जअसद्दसूइअपत्थाणो इदो एव्व आअच्छदि देवो । अहंवि दाव इमस्स पमुहादो किंवि ओसरिअ एदं मुहालिन्दतोरणं समस्सिदा होमि । एकान्ते स्थिता ।

। ततः प्रविशति सवयस्यो राजा ।

राजा ।

कान्तां विचिन्त्य सुलभेतरसंप्रयोगां
श्रुत्वा विदर्भपतिमानमितं बलैश्च ।
धाराभिरातप इवाभिहतं सरोजं
दुःखायते च हृदयं सुखमश्नुते च ॥ ३ ॥

---

१. एष जयशब्दसूचितप्रस्थान इत एवागच्छति देवः । अहमपि तावदस्य प्रमुखतः किंचिदपसृत्यैतन्मुखालिन्दतोरणं समाश्रिता भवामि ।

---

13. B जयसद्द॰.— F आअच्छइ.

विदूषकः । [1]जह देख्खामि तह सव्वहा एक्कन्तसुहिदो भवं भविस्सदि ।

राजा । सखे कथमिव ।

विदूषकः । [2]अज्ज किल देवीए धारिणीए पण्डिदकोसिई भणिदा । भअवदि जइ तुमं पसाहणगव्वं वहेसि तं दंसेहि मालविआए सरीरे वेदब्भअं विवाहणेवथ्थंति । ता सविसेसालंकिदा मालविआ । तत्तहोदी कदाविभ्भवदो मणोरहं पूरेइ ।

राजा । सखे मदपेक्षानुवृत्त्या निवृत्तेर्ष्याया धारिण्याः पूर्वचरितैः संभाव्यत एतत् ।

प्रती० । उपगम्य । [3]जेदु भट्टा । देवी विण्णवेदि तवणीआसोअस्स कुसुमसोहादंसणेण मह आरम्भो सफलो करीअदुत्ति ।

---

१. यथा पश्यामि तथा सर्वथैकान्तसुखितो भवान्भविष्यति ।

२. अद्य किल देव्या धारिण्या पण्डितकौशिकी भणिता । भगवति यदि त्वं प्रसाधनगर्वं वहसि तद्दर्शय मालविकायाः शरीरे वैदर्भकं विवाहनेपथ्यमिति । तत्सविशेषालंकृता मालविका । तत्रभवती कदाचिद्भवतो मनोरथं पूरयेत् ।

३. जयतु भर्ता । देवी विज्ञापयति । तपनीयाशोकस्य कुसुमशोभादर्शनेन ममारम्भः सफलः क्रियतामिति ।

---

1. F दख्खामि.—Our MSS. do not give "तह." We according to G.—B °सुहितो.
2. A B C D E read त्ति after "भविस्सदि."
4. B E °कोसिइ.
5. A C D E F वहसि.
6. A D E °णेवछ्छं; F °णेपछ्छं.
7. D कदाचि for "कदाविभ्."
8. A B C D E पुराएइ.
11. A विणवेदि.
12. F सोहादस्सणेण.— A B C D E महारम्भो for "मह आरम्भो." —A B C D सफलं.

राजा । ननु तत्रैव देवी ।

प्रतीहारी ।[1]अह इं । जहारुहसंमाणसुहिदं अन्तेउरजणं विसज्जिअ मालविअपुरोगेण अत्तणो परिअणेण सह देवं पडिवालेदि ।

राजा । सहर्षम् । विदूषकं विलोक्य । जयसेने गच्छाग्रतः ।

प्रतीहारी ।[2]इदो इदो देवो ।

। सर्वे परिक्रामन्ति ।

विदूषकः । विलोक्य ।[3]भो वअस्स किंवि परिवुत्तजोव्वणो विअ वसन्दो पमदवणे लक्खीअदि ।

राजा । यथावृत्तं भवानाह ।

अग्रे विकीर्णकुरबकफलजालविभुज्यमानसहकारम् ।
परिणामाभिमुखमृतोरुत्सुकयति यौवनं चेतः ॥ ४ ॥

विदूषकः ।[4]भो अअं सो दिण्णणेवथ्थो विअ कुसुमथ्थबएहिं तवणीआसोओ । ओलोअदु भवं ।

---

१. अथ किम् । यथार्हसंमानसुखितमन्तःपुरजनं विसर्ज्य मालविकापुरोगेणात्मनः परिजनेन सह देवं प्रतिपालयति ।

२. इत इतो देवः ।

३. भो वयस्य किमपि परिवृत्तयौवन इव वसन्तः प्रमदवने लक्ष्यते ।

४. भो अयं स दत्तनेपथ्य इव कुसुमस्तबकैस्तपनीयाशोकः । आलोकयतु भवान् ।

---

2. F °सुहं for "सुहिदं."—B विसज्जीअ.
3. B C E F मालविआ°.
8. B वयस्य.—A C किंवि ; D E किंचि ; F किंचिप्परिवुत्त°. —A C E °जोवणो.
13. A D E °णेवच्छो.

राजा । स्थाने खल्वयं प्रसवमन्थरोभूत् । यदयमिदानीमनन्यसाधारणां शोभामुद्वहति । पश्य ।

सर्वाशोकतरूणां प्रथमं सूचितवसन्तविभवानाम् ।
निर्वृत्तदोहदेस्मिन्संक्रान्तानीव कुसुमानि ॥ ८ ॥

विदूषकः । [1]भो विस्सध्धो होहि । अम्हेसु उवगदेसु धारिणी पस्सपरिवट्टिणीं मालविअं अणुणेइ ।

राजा । सहर्षम् । पश्य सखे ।

मामियमभ्युत्तिष्ठति देवी विनयादुपस्थिता प्रियया ।
विस्मृतहस्तकमलया नरेन्द्रलक्ष्म्या वसुमतीव ॥ ९ ॥

। ततः प्रविशति परिव्राजिका देवी मालविका विभवतश्च परिवारः ।

मालविका । आत्मगतम् । [2]जाणामि णिमित्तं कोदुआलंकारस्स । तहवि मम हिअअं विसिणीपत्तगअं सलिलं विअ वेवदि । दक्खिणेदरंवि णअणं पफ्फुरइ ।

विदूषकः । [3]भो असंदेहं वेवाहिअणेवथ्थेण सविसेसं सोहइ अत्तहोदी मालविआ ।

---

१. भो विश्रब्धो भव । आवयोरुपगतयोर्धारिणी पार्श्वपरिवर्तिनीं मालविकामनुनयति ।

२. जानामि निमित्तं कौतुकालंकारस्य । तथापि मम हृदयं बिसिनीपत्त्रगतं सलिलमिव वेपते । दक्षिणेतरमपि नयनं प्रस्फुरति ।

३. भो असंदेहं वैवाहिकनेपथ्येन सविशेषं शोभतेऽत्रभवती मालविका ।

---

1. Our MSS. omit अयं after "खलु." We with G.
4. B C D F °दौहृदे (°दोहिदे?).—
5. Our MSS. अम्हेसु उवगदेसु &c. as given above. G reads otherwise. See Notes.
8. F विनयादनु-[नू ?]-स्थिता प्रियया.
11. B D E परीवारः
13. B °पत्तगदं; F बिसिणीपत्तगदं.
14. A C दखिणेदरं.
15. A D E °णेवच्छेण.

राजा । पश्याम्याभरणालंकृतामिनाम् ।

अनतिलम्बिदुकूलनिवासिनी
लघुभिराभरणैः प्रतिभाति मे ।
उडुगणैरुदयोन्मुखचन्द्रिका
गतहिमैरिव चैत्रविभावरी ॥ ७ ॥

देवी । उपेत्य । [1]जेदु अज्जउत्तो ।

विदूषकः । [2]वड्ढदु होदी ।

परिव्राजिका । विजयतां देवः ।

राजा । भगवत्यभिवादये ।

परिव्राजिका । अभिप्रेतसिद्धिरस्तु ।

देवी । सस्मितम् । [3]अज्जउत्त एस दे तरुणीजणसहाअस्स असोओ संकेदघरओ अम्हेहिं विसज्जिदो ।

विदूषकः । [4]भो तुमं आराहिदोसि ।

राजा । सव्रीडमशोकमभितः परिक्रामन् ।

नायं देव्या भाजनत्वं न नेयः
सत्काराणामीदृशानामशोकः ।
यः सावज्ञो माधवश्रीनियोगे
पुष्पैः शंसत्यादरं त्वत्प्रयत्ने ॥ ८ ॥

---

१. जयत्वार्यपुत्रः ।
२. वर्धतां भवती ।
३. आर्यपुत्र एष ते तरुणीजनसहायस्याशोकः संकेतगृहकोस्माभिर्विसर्जितः ।
४. भो त्वमाराधितोसि ।

---

6. B उपसृत्य.—E F अ-अ°.
11. D E F अ-अ°.
12. E संकेतघरए corrected from an original संकेतघरओ.—F सज्जिदो (= सज्जितः).
13. A C अराहिदो°.
17. B C D सापेक्षो; A E too so originally, but they afterwards correct it into सापेक्षो.

विदूषकः । [1]भो विस्सध्धो भविअ इमं जोव्वणवदिं पेक्ख ।

देवी । [2]कं ।

विदूषकः । [3]तवणीआसोअकुसुमसोहं ।

सर्वे । उपविशन्ति ।

राजा । मालविकां विलोक्यात्मगतम् । कष्टं खलु संनिधिवियोगो मम्माद्य ।

अहं रथाङ्गनामेव प्रिया सहचरीव मे ।
अनुनुज्ञातसंपर्का धारिणी रजनीव नौ ॥ ९ ॥

। ततः प्रविशति कञ्चुकी ।

कञ्चुकी । जयतु जयतु देवः । अमात्यो विज्ञापयति । तस्मिन्विदर्भविषयोपायने द्वे शिल्पिदारिके मार्गपरिश्रमादलसशरीरे इति कृत्वा न प्रवेशिते । संप्रति देवोपस्थानयोग्ये । तदाज्ञां देवो दातुमर्हतीति ।

राजा । प्रवेशय ते ।

कञ्चुकी । यदाज्ञापयति देवः । इति निष्क्रम्य ताभ्यां सह पुनः प्रविश्य । इत इतो भवत्यौ ।

---

१. भो विश्रब्धो भूत्वेमां यौवनवतीं प्रेक्षस्व ।

२. काम् ।

३. तपनीयाशोककुसुमशोभाम् ।

---

1. B विस्सध्धो भवीअ.—Our MSS. तुमं for "इमं". We with G.

3. D °कुसुमसोहं ; F तवणीआसोअस्स कुसुम°.

10. A C F do not repeat "जयतु."

11. A B C D E शिल्प°.—B C D E F °परिक्रमात्.

12. A देवोपस्थाने योग्ये.

प्रथमा । जनान्तिकम् । [1]हला रअणिए अपुव्वं इमं राअउलं पविसन्तीए पसीदइ मे अब्भन्दरगदो अप्पा ।

द्वितीया । [2]हञ्जे जोसणीए महवि एव्वं एव्व । अत्थि क्खु एसो लोअवादो आआमि सुहं वा दुक्खं वा हिअअसमवत्था कहेदित्ति ।

प्रथमा ।[3]सो सच्चो दाणिं णो होदु ।

कञ्चुकी । एष देव्या सह देवस्तिष्ठति । तावदुपसर्पतां भवत्यौ ।

। उभे उपसर्पतः ।

। मालविका परिव्राजिका च चेट्यौ दृष्ट्वा परस्परमवलोकयतः ।

उभे । प्रणिपत्य ।[4]जेदु भट्टा जेदु भट्टा । जेदु भट्टिणी जेदु भट्टिणी ।

राजा । स्वागतम् । इतो निषीदतम् ।

उभे । उपविष्टे ।

---

१. हला रजनिके अपूर्वमिदं राजकुलं प्रविशन्त्याः प्रसीदति मेभ्यन्तरगत आत्मा ।

२. हञ्जे ज्योत्स्निके ममाप्येवमेव । अस्ति खल्वेष लोकवाद आगामि सुखं वा दुःखं वा हृदयसमवस्था कथयतीति ।

३. स सत्य इदानीमावयोर्भवतु ।

४. जयतु भर्ता जयतु भर्ता । जयतु भट्टिनी जयतु भट्टिनी ।

---

2. A C D E F अब्भन्तरं.
3. A B C D E महवि अ एव्व.
7. F उपसर्पताम्.
11. A C D E F जेदु भट्टा । जेदु भट्टिणी.

राजा । कस्यां कलायामभियोगो भवत्योः ।

उभे । [1]संगीदए अब्भन्तरम्ह ।

राजा । देवि गृह्यतामनयोरन्यतरा ।

देवी । [2]मालविए इदो देक्ख कदरा संगीदसहाइणी रुच्चइ ।

उभे । मालविकां दृष्ट्वा । [3]अम्हो भट्टिदारिआ । प्रणिपत्य सह तया बाष्पं विसृजतः ।

। सर्वे सविस्मयमालोकयन्ति ।

राजा । के भवत्यौ का चेयम् ।

प्रथमा । [4]देव इअं अम्हाणं भट्टिदारिआ ।

राजा । कथमिव ।

उभे । [5]सुणादु भट्टा । जो सो भट्टिणा विअअदण्डेहिं विदब्भणाहं वसीकरिअ बन्धणादो मोइदो कुमारो माहवसेणो णाम तस्स इअं कणीअसी भइणी मालविआ णाम ।

---

१. संगीतकेऽभ्यन्तरे स्वः ।
२. मालविके इतः प्रेक्षस्व कतरा संगीतसखी रोचते ।
३. अहो भर्तृदारिका ।
४. देव इयमावयोर्भर्तृदारिका ।
५. शृणोतु भर्ता । योऽसौ भर्त्रा विजयदण्डैर्विदर्भनाथं वशीकृत्य बन्धनान्मोचितः कुमारो माधवसेनो नाम तस्येयं कनीयसी भगिनी मालविका नाम ।

---

2. D E संगीतए.
4. F दक्ख.—B संगीत°.— A C °सहायिणी.
5. A B C D E भट्टदारिआ.
9. A इअं; D इयं.—A C भट्टार°; B D E भट्ट°.
12. B °करीअ.

देवी । [1]अम्हो राअदारिआ इअं । चन्दणं क्खु मए पादुआपरिभोएण दूसिदं ।

राजा । अथात्रभवती कथमिवेत्थंभूता ।

मालविका । निःश्वस्यात्मगतम् । [2]विहिणो णिओएण ।

द्वितीया । [3]भट्टा सुणादु । दाआदवसंगदे अम्हाणं भट्टदारए माहवसेणे तस्स अमच्चेण अज्जसुमइणा अम्हारिसं परिअणं उज्झिअ गूढं अवणीदा एसा ।

राजा । श्रुतपूर्वं मयैतत् । ततस्ततः ।

उभे । [4]एत्तिअं एव्व । अदो वरं ण आणीमो ।

परिव्राजिका । अतः परमहं मन्दभागिनी कथयिष्यामि ।

उभे । [5]भट्टिदारिए अज्जाए कोसिईए विअ सरओओ सुणीअदि ।

मालविका । [6]णं सा एव्व ।

---

१. अहो राजदारिकेयम् । चन्दनं खलु मया पादुकापरिभोगेण दूषितम् ।
२. विधेर्नियोगेन ।
३. भर्ता शृणोतु । दायादवशं गत आवयोर्भर्तृदारके माधवसेने तस्यामात्येनार्यसुमतिनास्मादृशं परिजनमुज्झित्वा गूढमपनीतैषा ।
४. एतावदेव । अतः परं न जानीवः ।
५. भर्तृदारिके आर्यायाः कौशिक्या इव स्वरयोगः श्रूयते ।
६. ननु सैव ।

---

1. A B C D E अहो for "अम्हो."
3. B अथ तत्र°.
4. D णीओएण.
6. B अमाच्चेण.—D E F अ-अ°.
7. B C D उज्झिआ.
8. B omits "ततस्ततः"
9. D E एत्तयं.
11. A B C भट्टार°; D E भट्ट°.—D E F अ-आए.—A C कोसीइए; B कोसिइए; D कोसीईए.—A सुरओओ; B C D सरिओओ.—F omits सुणीअदि.

उभे । [१]जइवेसधारिणी अज्जकोसिई दुक्खेण विभाविअदि । दुवेवि अम्हे भअवदिं वन्दामहे ।

परिव्राजिका । स्वस्ति भवतीभ्याम् ।

राजा । कथमाप्तवर्गीयं भवत्याः ।

परिव्राजिका । एवमेतत् ।

विदूषकः । [२]तेण हि कहेहि दाणिं अत्तहोदीए उत्तन्तावसेसं ।

परिव्राजिका । सवैक्लव्यम् । श्रूयतां तावत् । माधवसेनसचिवं सुमतिं ममाग्रजमवगच्छ ।

राजा । उपलब्धम् । ततस्ततः ।

परिव्राजिका । स इमां तथागतभ्रातृकां मया सार्धमपवाह्य भवत्संबन्धापेक्षया पथिकसार्थं वैदिशगामिनमनुप्रविष्टः ।

राजा । ततस्ततः ।

परिव्राजिका । स चाटव्यन्ते निविष्टो गताध्वा वणिग्जनोध्वश्रमार्तो विश्रामितुम् ।

---

१. यतिवेषधारिण्यार्यकौशिकी दुःखेन विभाव्यते । द्वे अप्यावां भगवतीं वन्दावहे ।

२. तेन हि कथयेदानीमत्रभवत्या वृत्तान्तविशेषम् ।

---

1. D E F अ-अ°.—A C °कोसिइ.
2. A दूवे°.—F भअवदीं.
4. E भगवत्याः.
6. F कहेहि २, *i. e.* कहेहि कहेहि.—A C D E अत्तहोदिए.
8. F उपगच्छ for "अवगच्छ."
11. A, as an after-correction, वि-दिश°; F विदेश°.
14. B C D E F विश्रमितुम्.

राजा । ततस्ततः ।

परिव्राजिका । ततश्च

तूणीरबन्धपरिणद्धभुजान्तरालम्
आकर्णलम्बिशिखिपिच्छकलापधारि ।
कोदण्डपाणि निनदत्प्रतिरोधकानाम्
आपातदुष्प्रसहमाविरभूदनीकम् ॥ १० ॥

मालविका । भयं निरूपयति ।

विदूषकः । [१]मा भआहि । अदिक्कन्तं क्खु भअवदी कहेदि ।

राजा । ततस्ततः ।

परिव्राजिका । ततो मुहूर्तं बद्धयुद्धास्ते पराङ्मुखीकृतास्तस्करैः सार्थवाहयोद्धारः ।

राजा । भगवति अतः परमिदानीं कष्टं श्रोतव्यम ।

परिव्राजिका । ततः स मत्सोदर्यः

इमां परीप्सुर्दुर्जातेः पराभिभवकातराम् ।
भर्तृप्रियः प्रियैर्भर्तुरानृण्यमसुभिर्गतः ॥ ११ ॥

प्रथमा । [२]हंहो गदो तादो मरणं ।

---

१. मा भीः । अतिक्रान्तं खलु भगवती कथयति ।
२. हंहो गतस्तातो मरणम् ।

---

3. B C D तूणीरबद्ध°; F तूणीरपट्ट°.
4. F आपार्ष्णि°.—F °शिखिबर्ह°.
8. B D E भयाहि. — E कहेइ; A C F कहेहि.
15. F भर्तुः प्रियः.
16. F तदो for "तादो."

द्वितीया । [1]अदो क्खु भट्टिदारिआए इअं समवत्था संवुत्ता ।

परिव्राजिका । बाष्पं विकिरति ।

राजा । तनुभृतामीदृशी लोकयात्रा । न शोचितव्यस्तत्रभवान्सफलीकृतभर्तृपिण्डः ।

परिव्राजिका । ततोहं मोहमुपागता यावत्संज्ञामुपलभे तावदियं दुर्लभदर्शना संवृत्ता ।

राजा । महत्खलु कष्टमनुभूतं भगवत्या ।

परिव्राजिका । ततो भ्रातृशरीरमग्निसात्कृत्वा पुनर्नवीकृतवैधव्यदुःखया मया त्वदीयं देशमवतीर्येमे काषाये गृहीते ।

राजा । युक्तः सज्जनस्यैष पन्थाः । ततस्ततः ।

परिव्राजिका । तत इयमप्याटविकेभ्यो वीरसेनं वीरसेनाद्देवीं गता देवीगृहे लब्धप्रवेशया मया पुनर्दृष्टा । इत्येतदवसानं कथायाः ।

मालविका । आत्मगतम् । [2]किं णु क्खु संपदं भट्टा भणादि ।

राजा । अहो परिभवोपहारिणो विनिपाताः । कुतः ।

---

१. अतः खलु भर्तृदारिकाया इयं समवस्था संवृत्ता ।

२. किं नु खलु सांप्रतं भर्ता भणति ।

---

1. A B C D E भट्ट°.
3. Our MSS. तनुत्यजाम्. We according to G.
5. Our MSS. add अस्मि after "उपागता." We with G.
7. F कृच्छ्रम् for "कष्टम्."
9. A B C D E omit "मया."–F कषाये.
11. F omits "वीरसेनम्".
12. B °गृहलब्ध°.
14. A B C D E omit "क्खु".
15. E परिभवप्रहारिणः, F परिभावोपनिपातिनो.

प्रेष्यभावेन नामेयं देवीशब्दक्षमा सती ।
स्नानीयवस्त्रक्रियया पत्त्रोर्णं वोपयुज्यते ॥ १२ ॥

धारिणी । [1]भअवदि तुए अभिजणवदिं मालविअं अणाचक्खन्तीए असंपदं किदं ।

परिव्राजिका । शान्तं पापं शान्तं पापम् । कारणेन खलु मया नैभृत्यमवलम्बितम् ।

धारिणी । [2]किं विअ अत्त कारणं ।

राजा । यदि वक्तव्यं कथ्यताम् ।

परिव्राजिका । इयं पितरि जीवति केनापि लोकयात्रागतेन सिद्धादेशेन साधुना मत्समक्षमादिष्टा संवत्सरमात्रं प्रेष्यभावमनुभूय ततः सदृशभर्तृगामिनी भविष्यतीति । तमवश्यं भाविनमादेशमस्यास्त्वत्पादशुश्रूषया परिणमन्तमवेक्ष्य कालप्रतीक्षया मया तत्साधु कृतमिति पश्यामि ।

राजा । युक्तोपेक्षा ।

। प्रविश्य कञ्चुकी ।

कञ्चुकी । देव कथान्तरेणान्तरितमिदममात्यो विज्ञापयति ।

---

१. भगवति त्वयाभिजनवतीं मालविकामनाचक्षाणयासांप्रतं कृतम् ।
२. किमिवात्र कारणम् ।

---

2. Our MSS. पत्त्रोर्णेवोपयुज्यते. We with Tullberg.
4. E omits "किदं."
6. A B C D E नैभृत्यम्.
10. A B C आदिष्टम्.
12. F omits "अवश्यम्."
16. B विज्ञापयामि for "निवेदयामि."

विदर्भगतमनुष्ठेयमवधारितमस्माभिः । देवस्य तावदभिमतं श्रोतुमिच्छामीति ।

राजा । मौद्गल्य तत्रभवतोर्भ्रात्रोर्यज्ञसेनमाधवसेनयोर्द्वैराज्यमवस्थापयितुकामोस्मि ।

तौ पृथग्वरदाकूले शिष्टामुत्तरदक्षिणे ।
नक्तं दिवं विभज्योभौ शीतोष्णकिरणाविव ॥ १३॥

कञ्चुकी । एवममात्यपरिषदे निवेदयामि ।

राजा । अङ्गुल्यानुमन्यते ।

[निष्क्रान्तः कञ्चुकी ।

प्रथमा । जनान्तिकम् । [1]भट्टिदारिए दिट्ठिआ भट्टिदारओ अध्धरज्जे पइट्ठं गमिस्सदि ।

मालविका । [2]एदं दाव बहु मन्तव्वं जं जीविदसंसआदो मुत्तो ।

। प्रविश्य कञ्चुकी ।

कञ्चुकी । विजयतां देवः । अमात्यो विज्ञापयति । कल्याणी देवस्य बुद्धिः । मन्त्रिपरिषदोप्येतदेव दर्शनम् ।

द्विधा विभक्तां श्रियमुद्वहन्तौ
धुरं रथाश्वाविव संग्रहीतुः ।
तौ स्थास्यतस्ते नृपतो निदेशे
परस्परावग्रहनिर्विकारौ ॥ १४ ॥

---

१. भर्तृदारिके दिष्ट्या भर्तृदारकोर्धराज्ये प्रतिष्ठां गमिष्यति ।
२. एतत्तावद्बहु मन्तव्यं यज्जीवितसंशयान्मुक्तः ।

---

1. G's reading, अभिप्रेतं, for "अभिमतं" deserves attention.
9. A C insert इति before "निष्क्रान्तः."
10. A B C D E भट्टदारए.—D E दिट्ठिया.—A B C D E भट्टदारओ.
12. A B C D E एवं for "एदं."—E omits "जं."
17. Our MSS. "यथाश्वाविव." We with G.

राजा । तेन हि मन्त्रिपरिषदं ब्रूहि सेनापतये वीरसेनाय लिख्यतामेवं क्रियतामिति ।

कञ्चुकी । तथा । इति निष्क्रम्य सप्राभृतकं लेखं गृहीत्वा पुनः प्रविश्य । अनुष्ठिता प्रभोराज्ञा । अयं पुनरिदानीं देवस्य सेनापतेः पुष्पमित्रस्य सकाशात्सप्राभृतको लेखः प्राप्तः । प्रत्यक्षीकरोत्वेनं देवः ।

राजा । सहसोपसृत्य प्राभृतकं सोपचारकं शिरसि कृत्वा परिजनायार्पयति । लेखं च नाट्येनोद्वेष्टयति ।

देवी । [१]अम्हहे तदोमुहं एव्व णो हिअअं । सुणिस्सं दाव गुरुअणकुसलाणन्तरं वसमित्तस्स वुत्तन्तं । अहिआरे क्खु मे पुत्तओ सेणावइणा णिउत्तो ।

राजा । उपविश्य वाचयति । स्वस्ति । यज्ञशरणात्सेनापतिः पुष्पमित्रो वैदिशस्थं पुत्रमायुष्मन्तमग्निमित्रं स्नेहात्परिष्वज्यानुदर्शयति । विदितमस्तु । योसौ राजसूययज्ञे दीक्षितेन

१. अम्महे ततोमुखमेव नो हृदयम् । श्रोष्यामि तावद्गुरुजनकुशलानन्तरं वसुमित्रस्य वृत्तान्तम् । अधिकारे खलु मे पुत्रकः सेनापतिना नियुक्तः ।

2. E omits "इति" after "क्रियताम्."
3. A B C D E सप्राभृतिकम्.
4. B inserts भो before "प्रभोः."
5. Our MSS. सोत्तरीयप्राभृतिकः [F °प्राभृतम्]. We with G.
6. B °करोत्वेतद्.
7. A C प्राभृतिकम्.
9. B तदोहमुहं (?) for "तदोमुहं"
10. B D उत्तन्तं.—G's reading is worth noticing, viz, अहिआरे खु सेणावइणो णिउत्तो.
11. B C णिवुत्तो.
13. B वैदेशस्थम्; E वैदिश्यम्.

मया राजपुत्रशतपरिवृतं वसुमित्रं गोप्तारमादिश्य संवत्सरोपावर्तनीयो निरर्गलस्तुरगो विसृष्टः स सिन्धोर्दक्षिणरोधसि चरन्नश्वानीकेन यवनानां प्रार्थितः । तत उभयोः सेनयोर्महानासीत्संमर्दः ।

देवी । विषादं निरूपयति ।

राजा । कथमीदृशं संवृत्तम् । शेषं पुनर्वाचयति ।

ततः परान्पराजित्य वसुमित्रेण धन्विना ।
प्रसह्य ह्रियमाणो मे वाजिराजो निवर्तितः ॥ १९ ॥

देवी । [1]दाणिं अस्ससइ मे हिअअं ।

राजा । लेखशेषं वाचयति । सोहमिदानीमंशुमतेव सगरः पौत्रेण प्रत्याहृताश्वो यक्ष्ये । तदिदानीं कालहीनं विगतरोषचेतसा भवता वधूजनेन सह यज्ञसंदर्शनायागन्तव्यमिति ।

राजा । अनुगृहीतोस्मि ।

परिव्राजिका । दिष्ट्या पुत्रविजयेन दंपती वर्धेते । देवीं विलोक्य ।

भर्त्रासि वीरपत्नीनां श्लाघ्यायां स्थापिता धुरि ।
वीरसूरिति शब्दोयं तनयात्त्वामुपस्थितः ॥ २० ॥

---

१. इदानीमाश्वसिति मे हृदयम् ।

---

2. F तुरंगः.
4. F विमर्दः for "संमर्दः."
5. B रूपयति.
9. E आस्ससइ.
11. G reads अकालहीनम्.
12. We read "इति" here from G.

विदूषकः । [1]होदि परितुट्ठोम्हि जं पिदरं अणुगदो वच्छो ।

राजा । मौद्गल्य कलभेन खलु यूथपतिरनुकृतः ।

कञ्चुकी ।

नैतावता वीरविजृम्भितेन
चित्तस्य नो विस्मयमादधाति ।
यस्याप्रधृष्यः प्रभवस्त्वमुच्चैर्
वह्नेरपां दग्धुरिवोरुजन्मा ॥ १७ ॥

राजा । मौद्गल्य यज्ञसेनश्यालमुररीकृत्य मुच्यन्तां सर्वे बन्धनस्थाः ।

कञ्चुकी । तथा ।

[इति निष्क्रान्तः ।

देवी । [2]जअसेणे गच्छ । इरावदीप्पमुहाणं अन्तेउराणं पुत्तस्स विअअवुत्तन्तं णिवेदेहि ।

प्रतीहारी । [3]तह । इति प्रस्थिता ।

देवी । [4]एहि दाव ।

प्रतीहारी । प्रतिनिवृत्य । [5]इअंम्हि ।

---

१. भवति परितुष्टोस्मि यत्पितरमनुगतो वत्सः ।
२. जयसेने गच्छ । इरावतीप्रमुखाणामन्तःपुराणां पुत्रविजयवृत्तान्तं निवेदय ।
३. तथा ।
४. एहि तावत् ।
५. इयमस्मि ।

---

1. A होदी.
12. B इरावदिप्प°; C D इरावदिप°.
13. B D E विअयउ°.
16. Our MSS. उपसृत्य. We with G.—B इयम्हि.

देवी । जनान्तिकम् । [1]जं मए असोअदोहलणिओए पडिण्णादं मालविआए तं च से अभिअणं च णिवेदिअ मह वअणेण इरावदिं अणुणेहि । तुएहं सच्चादो ण परिब्भंसइदव्वेत्ति ।

प्रतीहारी । [2]तह । इति निष्क्रम्य पुनः प्रविश्य । भट्टिणी पुत्तविअएण दिण्णपारितोसिआणं अन्तेउराणं आभलणाणं रअणमञ्जूसिआ संवुत्तम्हि ।

देवी । [3]किं अथ्थ अच्चरिअं । णं साहारणो ताणं मम अ अअं अब्भूदओ ।

प्रतीहारी । जनान्तिकम् । [4]इरावदी उण विण्णवेदि । सरिसं क्खु देवी णिवेदेदि । पुढमं संकप्पिदं अण्णहा कादुं ण जुज्जइत्ति ।

---

१. यन्मयाशोकदोहदनियोगे प्रतिज्ञातं मालविकायै तच्चास्या अभिजनं च निवेद्य मम वचनेनेरावतीमनुनय । त्वयाहं सत्यान्न परिभ्रंशयितव्येति ।

२. तथा । भट्टिनि पुत्रविजयेन दत्तपारितोषिकाणामन्तःपुराणामाभरणानां रत्नमञ्जूषिका संवृत्तास्मि ।

३. किमत्राश्चर्यम् । ननु साधारणस्तासां मम चायमभ्युदयः ।

४. इरावती पुनर्विज्ञापयति । सदृशं खलु देवी निवेदयति । प्रथमं संकल्पितमन्यथा कर्तुं न युज्यत इति ।

---

2. A B तत्तं for " तं च."—A C D E F मम for " मह."

3. D परिभंस°.

6. C °पारितोसिअणं.—B अवलाजणाणं for " आभलणाणं "; F आभलणरअण°.

8. F एथ्थ for "अथ्थ".—A B C D E omit "णं."—F अन्तेउराणं for "ताणं".

10. A C सरोसं, E सरिस्सं.—A B C D E omit "क्खु."

11. B D देवि.—A संकप्पिदं.

देवी । [1]भअवदि तुए अणुमदं इच्छामि अज्जसुमदिणा पुढमदो संकप्पिदं अज्जउत्तस्स मालविअं पडिवादेदुं ।

परिव्राजिका । इदानीमपि त्वमेवास्याः प्रभवसि ।

देवी । मालविकां हस्ते गृहीत्वा । [2]अज्जउत्तो इमं पिअणिवेदणाणुरूवं पारितोसिअं मालविअं पडिच्छदु ।

राजा । सव्रीडं जोषमास्ते ।

देवी । सस्मितम् । [3]तं किं अवधीरेदि मं अज्जउत्तो ।

विदूषकः । [4]होदि एवं लोअप्पवादो सव्वोवि णववरो लज्जालुओ होदि ।

राजा । विदूषकमवेक्षते ।

विदूषकः । [5]अह वा इमं देवीए दिण्णदेवीसद्दं मालविअं अत्तभवं पडिग्गहीदुं इच्छदि ।

---

१. भगवति तवानुमतामिच्छाम्यार्यसुमतिना प्रथमतः संकल्पितामार्यपुत्रस्य मालविकं प्रतिपादयितुम् ।
२. आर्यपुत्र इमां प्रियनिवेदनानुरूपं पारितोषिकं मालविकां प्रतीच्छतु ।
३. तत्किमवधारियति मामार्यपुत्रः ।
४. भवति एवं लोकप्रवादः सर्वोपि नववरो लज्जालुर्भवति ।
५. अथ वेमां देव्या दत्तदेवीशब्दां मालविकामत्रभवान्प्रतिग्रहीतुमिच्छति ।

---

1. D E F अ–अ°.
2. D E F अ–अ°.
4. D E F अ–अ°.
7. F अवधीरेहि = (अवधीरयसि).—E अवधारेदि.—D E F अ–अ°.
8. B लज्जलुओ.

11. Our MSS. do not give अह वा; and they read अरुहदि for इच्छदि in l. 12. We with G.—B इदं for "इमं."—B देवोसद्दं.—A B C D E तत्तभवं.
12. A B C D E पडिग्गहिदुं.

देवी । [1]जदा राअदारिआ इअं अभिअणेण एव्व तदा दिण्णो एव्व से देवीसद्दो । ता किं पुणरुत्तेण ।

परिव्राजिका । मा मैवम् ।

अप्याकरसमुत्पन्ना मणिजातिरसंस्कृता ।
जातरूपेण कल्याणि न हि संयोगमर्हति ॥ १८ ॥

देवी । [2]मरिसेदु भअवदी अब्भुदअकहाए मए लङ्घिदेत्ति । जअसेणे गच्छ तुमं दाव कोसेअपत्तोण्णं से सिग्घं उवणेहि ।

प्रतीहारी । [3]तह । इति निष्क्रम्य पत्त्रोर्णं गृहीत्वा प्रविश्य । देवि इदं तं ।

देवी । मालविकामवगुण्ठनवतीं कृत्वा । [4]दाणिं अज्जउत्तो पडिच्छदु ।

राजा । देवि त्वच्छासनादप्रत्युत्तरा वयम् ।

परिव्राजिका । हन्त प्रतिगृहीता ।

---

१. यदा राजदारिकेयमभिजनेनैव तदा दत्त एवास्या देवीशब्दः । तत्किं पुनरुक्तेन ।
२. मर्षयतु भगवती अभ्युदयकथया मया लङ्घितेति । जयसेने गच्छ त्वं तावत्कौशेयपत्त्रोर्णमस्याः शीघ्रमुपनय ।
३. तथा । इदं तत् ।
४. इदानीमार्यपुत्रः प्रतीच्छतु ।

---

2. B उणरुत्तेण.
6. A C अब्भूदअ°.—F लङ्घिदं for "लङ्घिदेत्ति."
7. B D E F कोसेअं पत्तोण्णं.
9. E omits "इति."—Our MSS. पत्त्रोर्णकौशेयम्. We with G.—A C D देवी इयं अम्हि, B E F इअं अम्हि, for "इदं तं." We with G.
11. D E F अ-अ°.

विदूषकः । [१]अहो देवीए अत्तहोदो अणुऊलदा ।

देवी । परिजनमवलोकयति ।

परिजनः । मालविकामुपेत्य । [२]जेदु भट्टिणी ।

देवी । परिव्राजिकामवेक्षते ।

परिव्राजिका । नैतच्चित्रं त्वयि । तथा हि ।

प्रतिपक्षेणापि पतिं सेवन्ते भर्तृवत्सलाः साध्व्यः ।
अन्यसरितां शतानि हि समुद्रगाः प्रापयन्त्यब्धिम् ॥१९॥

। प्रविश्य निपुणिका ।

निपुणिका । [३]जेदु भट्टा । इरावदी विण्णवेदि । उवआरादिक्कमेण तदा अहं अवरध्धा । संपदं पुण्णमणोरहो भट्टा । अहंवि भट्टिणा पसादमेत्तेण संभावइदव्वेत्ति ।

देवी । [४]णिउणिए अवस्सं ताए संदेसं अणुजाणिस्सदि अज्जउत्तो ।

निपुणिका । [५]जं देवी आणवेदि ।

[इति निष्क्रान्ता ।

---

१. अहो देव्या अत्रभवतोनुकूलता ।

२. जयतु भट्टिनी ।

३. जयतु भर्ता । इरावती विज्ञापयति । उपचारातिक्रमेण तदाहमपराद्धा । सांप्रतं पूर्णमनोरथो भर्ता । अहमपि भर्त्रा प्रसादमात्रेण संभावयितव्येति ।

४. निपुणिके अवश्यं तवः संदेशमनुज्ञास्यत्यार्यपुत्रः ।

५. यद्देव्याज्ञापयाति ।

---

1. A C D देविए.—A B C अणुऊलदा.
2. F omits this and the following speech.
5. F omits "त्वयि."
7. F शतान्यपि for "शतानि हि".—F उदधिम् for "अब्धिम्."
9. A B C E F उअआरादि°.
11. "पसादमेत्तेण" taken from G.
12. F ताए सेविदुं जाणिस्सिदि अ॰अउत्तो, for "ताए संदेसं अणुजाणिस्सदि अज्जउत्तो."
13. D E अ॰अ°.
14. D E अणवेदि.

परिव्राजिका । देव अहममुना भवत्संबन्धेन चरितार्थं माधवसेनं सभाजयितुमिच्छामि यदि मयि तव प्रसादः ।

देवी । [1]अवसिदकज्जाए भअवदीए अम्हे परिच्चइदुं ण जुत्तं ।

राजा । भगवति मदीयेषु लेखेषु तत्रभवते त्वामुद्दिश्य सभाजनाक्षराणि पातयिष्यामि ।

परिव्राजिका । युवयोः स्नेहेन परवानयं जनः ।

देवी । [2]आणवेदु अज्जउत्तो भूओवि किं पिअं अणुचिट्ठामि ।

राजा । किमतः परम् । तथापि भवत्वेवं तावत् ।

त्वं मे प्रसादसुमुखी भव चण्डि नित्यम्
एतावदेव मृगये प्रतिपक्षहेतोः ।
आशास्यमीतिविगमप्रभृति प्रजानां
संपत्स्यते न खलु गोप्तरि नाग्निमित्रे ॥ २० ॥

[इति निष्क्रान्ताः सर्वे ।

॥ इति पञ्चमोऽङ्कः ॥

॥ इति कालिदासविरचितं मालविकाग्निमित्रं नाम नाटकं समाप्तम् ॥

---

१. अवसितकार्यया भगवत्या वयं परित्यक्तुं न युक्तम् ।
२. आज्ञापयत्वार्यपुत्रो भूयोपि किं प्रियमनुतिष्ठामि ।


---

1. B चरितार्थमा°.
2. F मे for "मयि."
3. B भवसीदक°.
7. D E F अ॰अ°.—B भूयोत्ति.
11. Our MSS. आशास्यमित्यधिगम°; G आशास्यमभ्यधिगम.° We with Tullberg.

कात्स्यन

p. 8 – मोक्षा for मोक्षास्मि (verse 7)
p. 57 – अत्तणो (आत्मनः) seems = "your" Cf. âp – "your" in Bengali.
p. 78 – ननु परिग्गहाण "receive, will you not?" οἶσθ' ὡς ποίησον Oed. T. 54

NOTES.



ACT I.

P. 1, l. 1.—एकैश्वर्यस्थितोपि. The opposition shown by अपि between this epithet and प्रणतबहुफलः is merely verbal, the figure being an instance of what is called शब्दविरोध. एक, opposed to बहु in the other epithet, is used in a double sense, viz., that of 'supreme' and 'one.'

P. 1, l. 3.—अष्टाभिः. Cf. the introductory stanza of the S'âkuntala.

P. 1, l. 4.—सन्मार्गालोकनाय, 'to see the good paths' (of morality, religion &c.), *i.e., that we may see &c.*

P. 1, l. 7.—मारिष:. By this name the Sûtradhâra usually addresses his assistant (पारिपार्श्विकः), who in his turn uses भाव as a term of respect in addressing his master.

P. 1, l. 10.—वसन्तोत्सवे. The Vasanta Festival comes annually on the first day of the dark or second half of the month of Phâlguna, *i.e.*, on the first day of Spring, to welcome the advent of which was the original object of the festival. This holiday, now so much abused by the vulgar classes in the form of the *holi* enormities, appears to have been more soberly enjoyed in olden times. The observances enjoined for the Vasantotsava day are: 1, That a man shall touch a Mahâr, and shall then bathe, to secure freedom from all sin, from sorrows and diseases. 2, That he shall worship the *holi* spot, to secure the destruction of all pain, with this mantra: वन्दितासि सुरेन्द्रेण ब्रह्मणा शंकरेण च । अतस्त्वं पाहि नो देवि भूते भूतिप्रदा भव । 3, That he shall eat the blossom of the mango-tree mixed with sandal-wood, to secure the highest happiness, with this mantra: चूतमग्र्यं वसन्तस्य माकन्द

कुसुमं तव । सचन्दनं पिबाम्यद्य सर्वकामार्थसिद्धये. See *Nirṇayasindhu*, under 'Vasantotsava.' During the *holi* festival dramatic representations of all sorts are still very common. See also the opening of the first Act of Ratnâvalî.

P. 1, l. 12.—भास &c. Bhâsa and Saumilla were two dramatic writers, but nothing is known about them or the works they composed. None of our MSS. read धावक in place of भास. MS. G reads भाससौमिल्लकविपुत्रादीनां. See Preface.

P. 2, l. 14.—MS. G inserts the word उवदेसग्गहणे after "अन्तरेण."

P. 2, l. 18.—धीरदा 'Whence this seriousness?' 'What are you contemplating so deeply?' The word signifies a pensive and contemplating mood of the mind when the person is so serious, and engaged so much in reflection, that he fails to mark what passes around or beside him.

P. 3, l. 3.—उवालम्भे, viz. "समीवेवि अदिक्कमन्दी इदो दिट्ठिं ण देसि."

P. 3, l. 7.—कहिं. Cf. note *infra* on p. 72, l. 14.

P. 3, l. 10.—इदिस, referring to her studies in music and dancing.

P. 3, l. 12.—सो जणो, referring to Mâlavikâ.

P. 5, l. 2.—णिव्वन्धिदुं 'to press,' 'to importune.' Cf. Raghuvaṁs'a V. 21—वसुलच्छीए. Vasulakshmî was the younger sister of Dhâriṇî. MS. G.'s reading after पवुत्तो is worthy of note: जाव ण कहेदि देवी दाव कुमारिए &c.

P. 5, l. 11.—MS. G reads, very desirably, से after "जाव."

P. 5, l. 12.—गणदासः । प्रविश्य । The MSS. read प्रविश्य गणदासः in this place and similarly in almost every other place subsequently throughout the play, where the stage-direction, प्रविश्य So-and-So, occurs. But I have in all cases inverted the order, and given the name of the character first for the sake of uniformity.

P. 5, l. 13.—न पुनरस्माकं तु. With the use here of the two adversative particles, cf. S'âkuntala, Act VII., "किंतु अङ्गुरासंबन्धेण उण इमस्स बालअस्स जणणी इन्दइजेव देवगुरुणो तवोवणे पसूदा," p. 176, l. 14, Calc. Ed. 1860.

P. 6, l. 2.—रुद्रेणेदमुमाकृतव्यतिकरे &c. The duality in unity of S'iva and his wife Pârvatî is represented as having but two sides between them, the left side of S'iva being the same as the person of Pârvatî, and *vice versa*, that is, S'iva and Pârvatî are one individual, the left portion of whose body is female (representing the goddess), and the right one male (representing the god). And as S'iva is fond of music and dancing, he is represented as dancing and singing with his consort thus united with him.

P. 6, l. 4.—बहुधा. Construe with भिन्नरुचेः.

P. 6, l. 9.—विभाव्यताम्. 'Let (the Queen) be made to understand,' *i.e.* let her be informed, &c. "Let her be honoured (with a communica

P. 7, l. 2.—मन्दायणीदोरे. Mandâkinî is a name that usually signifies 'the river of the air or heaven' (the Ganges or a feeder of it before it reaches the plains?); but it is also the name of an actual river flowing, according to the Vâyu Purâṇa, from the Riksha mountain. (See Vishṇu Purâṇa, p. 184. n. 70.) There is no doubt that the Mandâkinî of the present passage is a river of the Deccan. And further, it is probable that it may here stand for the *Narmadâ*, in conformity with a practice, still very common all over India, of designating any sacred river by the most sacred river-name, as Gangâ, &c. The apparent difficulty, however, would disappear by our reading with G, णम्मदा–[कूले] for " मन्दायणी"–[दोरे].

P. 7, l. 7.—जलमिव समुद्रशुक्तौ. Referring to the notion that drops of rain fallen under the auspices of the asterism or star *Arcturus* into the sea-shells produce pearls.

P. 7, l. 14.—लब्धक्षणाः, 'who have obtained recess.' In क्षण the Marâṭhî reader will doubtless recognise his own word सण, a festival. For one of the secondary senses of क्षण is 'leisure,' 'vacation.' See note *infra* on p. 31, l. 1.

P. 8, l. 2.—किं प्रपद्यते वैदर्भः, 'What is the king of the Vidarbhas about ?' *i. e.* 'what does he mean ?' प्रतिपद्यते, as read by G and also by Tullberg, would mean 'what does the Vidarbha say in reply ?'

P. 8, l. 4.—MS. G reads लिखितम् in place of निदेशम्.

P. 8, l. 5.—पूज्येन. A term of respect applied to the person addressed, who is king Agnimitra in the present passage.

